8.001.01a मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।

8.001.01c इन्द्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥

8.001.02a अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहम् ।

8.001.02c विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनम् ॥

8.001.03a यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।

8.001.03c अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम् ॥

8.001.04a वि तर्तूर्यन्ते मघवन्विपश्चितोऽर्यो विपो जनानाम् ।

8.001.04c उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥

8.001.05a महे चन त्वामद्रिवः परा शुल्काय देयाम् ।

8.001.05c न सहस्राय नायुताय वज्रिवो न शताय शतामघ ॥

8.001.06a वस्याँ इन्द्रासि मे पितुरुत भ्रातुरभुञ्जतः ।

8.001.06c माता च मे छदयथः समा वसो वसुत्वनाय राधसे ॥

8.001.07a क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः ।

8.001.07c अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः ॥

8.001.08a प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः ।

8.001.08c याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः ॥

8.001.09a ये ते सन्ति दशग्विनः शतिनो ये सहस्रिणः ।

8.001.09c अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि ॥

8.001.10a आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसम् ।

8.001.10c इन्द्रं धेनुं सुदुघामन्यामिषमुरुधारामरंकृतम् ॥

8.001.11a यच्चुदत्सूर एतशं वङ्कू वातस्य पर्णिना ।

8.001.11c वहत्कुत्समार्जुनेयं शतक्रतुः त्सरद्गन्धर्वमस्तृतम् ॥

8.001.12a य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।

8.001.12c संधाता संधिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः ॥

8.001.13a मा भूम निष्ट्या इवेन्द्र त्वदरणा इव ।

8.001.13c वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥

8.001.14a अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।

8.001.14c सकृत्सु ते महता शूर राधसा अनु स्तोमं मुदीमहि ॥

8.001.15a यदि स्तोमं मम श्रवदस्माकमिन्द्रमिन्दवः ।

8.001.15c तिरः पवित्रं ससृवांस आशवो मन्दन्तु तुग्र्यावृधः ॥

8.001.16a आ त्व१द्य सधस्तुतिं वावातुः सख्युरा गहि ।

8.001.16c उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिम् ॥

8.001.17a सोता हि सोममद्रिभिरेमेनमप्सु धावत ।

8.001.17c गव्या वस्त्रेव वासयन्त इन्नरो निर्धुक्षन्वक्षणाभ्यः ॥

8.001.18a अध ज्मो अध वा दिवो बृहतो रोचनादधि ।

8.001.18c अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥

8.001.19a इन्द्राय सु मदिन्तमं सोमं सोता वरेण्यम् ।

8.001.19c शक्र एणं पीपयद्विश्वया धिया हिन्वानं न वाजयुम् ॥

8.001.20a मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा ।

8.001.20c भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् ॥

8.001.21a मदेनेषितं मदमुग्रमुग्रेण शवसा ।

8.001.21c विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः ॥

8.001.22a शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।

8.001.22c स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥

8.001.23a एन्द्र याहि मत्स्व चित्रेण देव राधसा ।

8.001.23c सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरम् ॥

8.001.24a आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये ।

8.001.24c ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये ॥

8.001.25a आ त्वा रथे हिरण्यये हरी मयूरशेप्या ।

8.001.25c शितिपृष्ठा वहतां मध्वो अन्धसो विवक्षणस्य पीतये ॥

8.001.26a पिबा त्वस्य गिर्वणः सुतस्य पूर्वपा इव ।

8.001.26c परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥

8.001.27a य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।

8.001.27c गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥

8.001.28a त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक् ।

8.001.28c त्वं भा अनु चरो अध द्विता यदिन्द्र हव्यो भुवः ॥

8.001.29a मम त्वा सूर उदिते मम मध्यंदिने दिवः ।

8.001.29c मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत ॥

8.001.30a स्तुहि स्तुहीदेते घा ते मंहिष्ठासो मघोनाम् ।

8.001.30c निन्दिताश्वः प्रपथी परमज्या मघस्य मेध्यातिथे ॥

8.001.31a आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहम् ।

8.001.31c उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥

8.001.32a य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया ।

8.001.32c एष विश्वान्यभ्यस्तु सौभगासङ्गस्य स्वनद्रथः ॥

8.001.33a अध प्लायोगिरति दासदन्यानासङ्गो अग्ने दशभिः सहस्रैः ।

8.001.33c अधोक्षणो दश मह्यं रुशन्तो नळा इव सरसो निरतिष्ठन् ॥

8.001.34a अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरम्बमाणः ।

8.001.34c शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥

8.002.01a इदं वसो सुतमन्धः पिबा सुपूर्णमुदरम् ।

8.002.01c अनाभयिन्ररिमा ते ॥

8.002.02a नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः ।

8.002.02c अश्वो न निक्तो नदीषु ॥

8.002.03a तं ते यवं यथा गोभिः स्वादुमकर्म श्रीणन्तः ।

8.002.03c इन्द्र त्वास्मिन्सधमादे ॥

8.002.04a इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः ।

8.002.04c अन्तर्देवान्मर्त्यांश्च ॥

8.002.05a न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसम् ।

8.002.05c अपस्पृण्वते सुहार्दम् ॥

8.002.06a गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयन्ते ।

8.002.06c अभित्सरन्ति धेनुभिः ॥

8.002.07a त्रय इन्द्रस्य सोमाः सुतासः सन्तु देवस्य ।

8.002.07c स्वे क्षये सुतपाव्नः ॥

8.002.08a त्रयः कोशास श्चोतन्ति तिस्रश्चम्वः सुपूर्णाः ।

8.002.08c समाने अधि भार्मन् ॥

8.002.09a शुचिरसि पुरुनिष्ठाः क्षीरैर्मध्यत आशीर्तः ।

8.002.09c दध्ना मन्दिष्ठः शूरस्य ॥

8.002.10a इमे त इन्द्र सोमास्तीव्रा अस्मे सुतासः ।

8.002.10c शुक्रा आशिरं याचन्ते ॥

8.002.11a ताँ आशिरं पुरोळाशमिन्द्रेमं सोमं श्रीणीहि ।

8.002.11c रेवन्तं हि त्वा शृणोमि ॥

8.002.12a हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् ।

8.002.12c ऊधर्न नग्ना जरन्ते ॥

8.002.13a रेवाँ इद्रेवत स्तोता स्यात्त्वावतो मघोनः ।

8.002.13c प्रेदु हरिवः श्रुतस्य ॥

8.002.14a उक्थं चन शस्यमानमगोररिरा चिकेत ।

8.002.14c न गायत्रं गीयमानम् ॥

8.002.15a मा न इन्द्र पीयत्नवे मा शर्धते परा दाः ।

8.002.15c शिक्षा शचीवः शचीभिः ॥

8.002.16a वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः ।

8.002.16c कण्वा उक्थेभिर्जरन्ते ॥

8.002.17a न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ ।

8.002.17c तवेदु स्तोमं चिकेत ॥

8.002.18a इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति ।

8.002.18c यन्ति प्रमादमतन्द्राः ॥

8.002.19a आो षु प्र याहि वाजेभिर्मा हृणीथा अभ्यस्मान् ।

8.002.19c महाँ इव युवजानिः ॥

8.002.20a मो ष्वद्य दुर्हणावान्सायं करदारे अस्मत् ।

8.002.20c अश्रीर इव जामाता ॥

8.002.21a विद्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिम् ।

8.002.21c त्रिषु जातस्य मनांसि ॥

8.002.22a आ तू षिञ्च कण्वमन्तं न घा विद्म शवसानात् ।

8.002.22c यशस्तरं शतमूतेः ॥

8.002.23a ज्येष्ठेन सोतरिन्द्राय सोमं वीराय शक्राय ।

8.002.23c भरा पिबन्नर्याय ॥

8.002.24a यो वेदिष्ठो अव्यथिष्वश्वावन्तं जरितृभ्यः ।

8.002.24c वाजं स्तोतृभ्यो गोमन्तम् ॥

8.002.25a पन्यम्पन्यमित्सोतार आ धावत मद्याय ।

8.002.25c सोमं वीराय शूराय ॥

8.002.26a पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् ।

8.002.26c नि यमते शतमूतिः ॥

8.002.27a एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम् ।

8.002.27c गीर्भिः श्रुतं गिर्वणसम् ॥

8.002.28a स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।

8.002.28c शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादम् ॥

8.002.29a स्तुतश्च यास्त्वा वर्धन्ति महे राधसे नृम्णाय ।

8.002.29c इन्द्र कारिणं वृधन्तः ॥

8.002.30a गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि ।

8.002.30c सत्रा दधिरे शवांसि ॥

8.002.31a एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः ।

8.002.31c सनादमृक्तो दयते ॥

8.002.32a हन्ता वृत्रं दक्षिणेनेन्द्रः पुरू पुरुहूतः ।

8.002.32c महान्महीभिः शचीभिः ॥

8.002.33a यस्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च ।

8.002.33c अनु घेन्मन्दी मघोनः ॥

8.002.34a एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे ।

8.002.34c वाजदावा मघोनाम् ॥

8.002.35a प्रभर्ता रथं गव्यन्तमपाकाच्चिद्यमवति ।

8.002.35c इनो वसु स हि वोळ्हा ॥

8.002.36a सनिता विप्रो अर्वद्भिर्हन्ता वृत्रं नृभिः शूरः ।

8.002.36c सत्योऽविता विधन्तम् ॥

8.002.37a यजध्वैनं प्रियमेधा इन्द्रं सत्राचा मनसा ।

8.002.37c यो भूत्सोमैः सत्यमद्वा ॥

8.002.38a गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानम् ।

8.002.38c कण्वासो गात वाजिनम् ॥

8.002.39a य ऋते चिद्गास्पदेभ्यो दात्सखा नृभ्यः शचीवान् ।

8.002.39c ये अस्मिन्काममश्रियन् ॥

8.002.40a इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् ।

8.002.40c मेषो भूतो३ऽभि यन्नयः ॥

8.002.41a शिक्षा विभिन्दो अस्मै चत्वार्ययुता ददत् ।

8.002.41c अष्टा परः सहस्रा ॥

8.002.42a उत सु त्ये पयोवृधा माकी रणस्य नप्त्या ।

8.002.42c जनित्वनाय मामहे ॥

8.003.01a पिबा सुतस्य रसिनो मत्स्वा न इन्द्र गोमतः ।

8.003.01c आपिर्नो बोधि सधमाद्यो वृधे३ऽस्माँ अवन्तु ते धियः ॥

8.003.02a भूयाम ते सुमतौ वाजिनो वयं मा न स्तरभिमातये ।

8.003.02c अस्माञ्चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥

8.003.03a इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।

8.003.03c पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥

8.003.04a अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।

8.003.04c सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये ॥

8.003.05a इन्द्रमिद्देवतातय इन्द्रं प्रयत्यध्वरे ।

8.003.05c इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥

8.003.06a इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।

8.003.06c इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः ॥

8.003.07a अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।

8.003.07c समीचीनास ऋभवः समस्वरन्रुद्रा गृणन्त पूर्व्यम् ॥

8.003.08a अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।

8.003.08c अद्या तमस्य महिमानमायवोऽनु ष्टुवन्ति पूर्वथा ॥

8.003.09a तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये ।

8.003.09c येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥

8.003.10a येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।

8.003.10c सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥

8.003.11a शग्धी न इन्द्र यत्त्वा रयिं यामि सुवीर्यम् ।

8.003.11c शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥

8.003.12a शग्धी नो अस्य यद्ध पौरमाविथ धिय इन्द्र सिषासतः ।

8.003.12c शग्धि यथा रुशमं श्यावकं कृपमिन्द्र प्रावः स्वर्णरम् ॥

8.003.13a कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।

8.003.13c नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥

8.003.14a कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।

8.003.14c कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥

8.003.15a उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।

8.003.15c सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥

8.003.16a कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।

8.003.16c इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥

8.003.17a युक्ष्वा हि वृत्रहन्तम हरी इन्द्र परावतः ।

8.003.17c अर्वाचीनो मघवन्सोमपीतय उग्र ऋष्वेभिरा गहि ॥

8.003.18a इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये ।

8.003.18c स त्वं नो मघवन्निन्द्र गिर्वणो वेनो न शृणुधी हवम् ॥

8.003.19a निरिन्द्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः ।

8.003.19c निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः ॥

8.003.20a निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः ।

8.003.20c निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम् ॥

8.003.21a यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः ।

8.003.21c विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम् ॥

8.003.22a रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्राम् ।

8.003.22c अदाद्रायो विबोधनम् ॥

8.003.23a यस्मा अन्ये दश प्रति धुरं वहन्ति वह्नयः ।

8.003.23c अस्तं वयो न तुग्र्यम् ॥

8.003.24a आत्मा पितुस्तनूर्वास ओजोदा अभ्यञ्जनम् ।

8.003.24c तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवम् ॥

8.004.01a यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः ।

8.004.01c सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥

8.004.02a यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।

8.004.02c कण्वासस्त्वा ब्रह्मभि स्तोमवाहस इन्द्रा यच्छन्त्या गहि ॥

8.004.03a यथा गौरो अपा कृतं तृष्यन्नेत्यवेरिणम् ।

8.004.03c आपित्वे नः प्रपित्वे तूयमा गहि कण्वेषु सु सचा पिब ॥

8.004.04a मन्दन्तु त्वा मघवन्निन्द्रेन्दवो राधोदेयाय सुन्वते ।

8.004.04c आमुष्या सोममपिबश्चमू सुतं ज्येष्ठं तद्दधिषे सहः ॥

8.004.05a प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा ।

8.004.05c विश्वे त इन्द्र पृतनायवो यहो नि वृक्षा इव येमिरे ॥

8.004.06a सहस्रेणेव सचते यवीयुधा यस्त आनळुपस्तुतिम् ।

8.004.06c पुत्रं प्रावर्गं कृणुते सुवीर्ये दाश्नोति नमउक्तिभिः ॥

8.004.07a मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।

8.004.07c महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुम् ॥

8.004.08a सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।

8.004.08c मध्वा सम्पृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥

8.004.09a अश्वी रथी सुरूप इद्गोमाँ इदिन्द्र ते सखा ।

8.004.09c श्वात्रभाजा वयसा सचते सदा चन्द्रो याति सभामुप ॥

8.004.10a ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।

8.004.10c निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥

8.004.11a अध्वर्यो द्रावया त्वं सोममिन्द्रः पिपासति ।

8.004.11c उप नूनं युयुजे वृषणा हरी आ च जगाम वृत्रहा ॥

8.004.12a स्वयं चित्स मन्यते दाशुरिर्जनो यत्रा सोमस्य तृम्पसि ।

8.004.12c इदं ते अन्नं युज्यं समुक्षितं तस्येहि प्र द्रवा पिब ॥

8.004.13a रथेष्ठायाध्वर्यवः सोममिन्द्राय सोतन ।

8.004.13c अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वन्तो दाश्वध्वरम् ॥

8.004.14a उप ब्रध्नं वावाता वृषणा हरी इन्द्रमपसु वक्षतः ।

8.004.14c अर्वाञ्चं त्वा सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप ॥

8.004.15a प्र पूषणं वृणीमहे युज्याय पुरूवसुम् ।

8.004.15c स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥

8.004.16a सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन ।

8.004.16c त्वे तन्नः सुवेदमुस्रियं वसु यं त्वं हिनोषि मर्त्यम् ॥

8.004.17a वेमि त्वा पूषन्नृञ्जसे वेमि स्तोतव आघृणे ।

8.004.17c न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥

8.004.18a परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य ।

8.004.18c अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये ॥

8.004.19a स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।

8.004.19c राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥

8.004.20a धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।

8.004.20c षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥

8.004.21a वृक्षाश्चिन्मे अभिपित्वे अरारणुः ।

8.004.21c गां भजन्त मेहनाश्वं भजन्त मेहना ॥

8.005.01a दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् ।

8.005.01c वि भानुं विश्वधातनत् ॥

8.005.02a नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा ।

8.005.02c सचेथे अश्विनोषसम् ॥

8.005.03a युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत ।

8.005.03c वाचं दूतो यथोहिषे ॥

8.005.04a पुरुप्रिया ण ऊतये पुरुमन्द्रा पुरूवसू ।

8.005.04c स्तुषे कण्वासो अश्विना ॥

8.005.05a मंहिष्ठा वाजसातमेषयन्ता शुभस्पती ।

8.005.05c गन्तारा दाशुषो गृहम् ॥

8.005.06a ता सुदेवाय दाशुषे सुमेधामवितारिणीम् ।

8.005.06c घृतैर्गव्यूतिमुक्षतम् ॥

8.005.07a आ न स्तोममुप द्रवत्तूयं श्येनेभिराशुभिः ।

8.005.07c यातमश्वेभिरश्विना ॥

8.005.08a येभिस्तिस्रः परावतो दिवो विश्वानि रोचना ।

8.005.08c त्रीँरक्तून्परिदीयथः ॥

8.005.09a उत नो गोमतीरिष उत सातीरहर्विदा ।

8.005.09c वि पथः सातये सितम् ॥

8.005.10a आ नो गोमन्तमश्विना सुवीरं सुरथं रयिम् ।

8.005.10c वोळ्हमश्वावतीरिषः ॥

8.005.11a वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी ।

8.005.11c पिबतं सोम्यं मधु ॥

8.005.12a अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः ।

8.005.12c छर्दिर्यन्तमदाभ्यम् ॥

8.005.13a नि षु ब्रह्म जनानां याविष्टं तूयमा गतम् ।

8.005.13c मो ष्वश्न्याँ उपारतम् ॥

8.005.14a अस्य पिबतमश्विना युवं मदस्य चारुणः ।

8.005.14c मध्वो रातस्य धिष्ण्या ॥

8.005.15a अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम् ।

8.005.15c पुरुक्षुं विश्वधायसम् ॥

8.005.16a पुरुत्रा चिद्धि वां नरा विह्वयन्ते मनीषिणः ।

8.005.16c वाघद्भिरश्विना गतम् ॥

8.005.17a जनासो वृक्तबर्हिषो हविष्मन्तो अरंकृतः ।

8.005.17c युवां हवन्ते अश्विना ॥

8.005.18a अस्माकमद्य वामयं स्तोमो वाहिष्ठो अन्तमः ।

8.005.18c युवाभ्यां भूत्वश्विना ॥

8.005.19a यो ह वां मधुनो दृतिराहितो रथचर्षणे ।

8.005.19c ततः पिबतमश्विना ॥

8.005.20a तेन नो वाजिनीवसू पश्वे तोकाय शं गवे ।

8.005.20c वहतं पीवरीरिषः ॥

8.005.21a उत नो दिव्या इष उत सिन्धूँरहर्विदा ।

8.005.21c अप द्वारेव वर्षथः ॥

8.005.22a कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा ।

8.005.22c यद्वां रथो विभिष्पतात् ॥

8.005.23a युवं कण्वाय नासत्या अपिरिप्ताय हर्म्ये ।

8.005.23c शश्वदूतीर्दशस्यथः ॥

8.005.24a ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः ।

8.005.24c यद्वां वृषण्वसू हुवे ॥

8.005.25a यथा चित्कण्वमावतं प्रियमेधमुपस्तुतम् ।

8.005.25c अत्रिं शिञ्जारमश्विना ॥

8.005.26a यथोत कृत्व्ये धनेऽंशुं गोष्वगस्त्यम् ।

8.005.26c यथा वाजेषु सोभरिम् ॥

8.005.27a एतावद्वां वृषण्वसू अतो वा भूयो अश्विना ।

8.005.27c गृणन्तः सुम्नमीमहे ॥

8.005.28a रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना ।

8.005.28c आ हि स्थाथो दिविस्पृशम् ॥

8.005.29a हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः ।

8.005.29c उभा चक्रा हिरण्यया ॥

8.005.30a तेन नो वाजिनीवसू परावतश्चिदा गतम् ।

8.005.30c उपेमां सुष्टुतिं मम ॥

8.005.31a आ वहेथे पराकात्पूर्वीरश्नन्तावश्विना ।

8.005.31c इषो दासीरमर्त्या ॥

8.005.32a आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना ।

8.005.32c पुरुश्चन्द्रा नासत्या ॥

8.005.33a एह वां प्रुषितप्सवो वयो वहन्तु पर्णिनः ।

8.005.33c अच्छा स्वध्वरं जनम् ॥

8.005.34a रथं वामनुगायसं य इषा वर्तते सह ।

8.005.34c न चक्रमभि बाधते ॥

8.005.35a हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः ।

8.005.35c धीजवना नासत्या ॥

8.005.36a युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू ।

8.005.36c ता नः पृङ्क्तमिषा रयिम् ॥

8.005.37a ता मे अश्विना सनीनां विद्यातं नवानाम् ।

8.005.37c यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनाम् ॥

8.005.38a यो मे हिरण्यसंदृशो दश राज्ञो अमंहत ।

8.005.38c अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः ॥

8.005.39a माकिरेना पथा गाद्येनेमे यन्ति चेदयः ।

8.005.39c अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः ॥

8.006.01a महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव ।

8.006.01c स्तोमैर्वत्सस्य वावृधे ॥

8.006.02a प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ।

8.006.02c विप्रा ऋतस्य वाहसा ॥

8.006.03a कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।

8.006.03c जामि ब्रुवत आयुधम् ॥

8.006.04a समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।

8.006.04c समुद्रायेव सिन्धवः ॥

8.006.05a ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ।

8.006.05c इन्द्रश्चर्मेव रोदसी ॥

8.006.06a वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा ।

8.006.06c शिरो बिभेद वृष्णिना ॥

8.006.07a इमा अभि प्र णोनुमो विपामग्रेषु धीतयः ।

8.006.07c अग्नेः शोचिर्न दिद्युतः ॥

8.006.08a गुहा सतीरुप त्मना प्र यच्छोचन्त धीतयः ।

8.006.08c कण्वा ऋतस्य धारया ॥

8.006.09a प्र तमिन्द्र नशीमहि रयिं गोमन्तमश्विनम् ।

8.006.09c प्र ब्रह्म पूर्वचित्तये ॥

8.006.10a अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ ।

8.006.10c अहं सूर्य इवाजनि ॥

8.006.11a अहं प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् ।

8.006.11c येनेन्द्रः शुष्ममिद्दधे ॥

8.006.12a ये त्वामिन्द्र न तुष्टुवुरृषयो ये च तुष्टुवुः ।

8.006.12c ममेद्वर्धस्व सुष्टुतः ॥

8.006.13a यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन् ।

8.006.13c अपः समुद्रमैरयत् ॥

8.006.14a नि शुष्ण इन्द्र धर्णसिं वज्रं जघन्थ दस्यवि ।

8.006.14c वृषा ह्युग्र शृण्विषे ॥

8.006.15a न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम् ।

8.006.15c न विव्यचन्त भूमयः ॥

8.006.16a यस्त इन्द्र महीरपः स्तभूयमान आशयत् ।

8.006.16c नि तं पद्यासु शिश्नथः ॥

8.006.17a य इमे रोदसी मही समीची समजग्रभीत् ।

8.006.17c तमोभिरिन्द्र तं गुहः ॥

8.006.18a य इन्द्र यतयस्त्वा भृगवो ये च तुष्टुवुः ।

8.006.18c ममेदुग्र श्रुधी हवम् ॥

8.006.19a इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् ।

8.006.19c एनामृतस्य पिप्युषीः ॥

8.006.20a या इन्द्र प्रस्वस्त्वासा गर्भमचक्रिरन् ।

8.006.20c परि धर्मेव सूर्यम् ॥

8.006.21a त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः ।

8.006.21c त्वां सुतास इन्दवः ॥

8.006.22a तवेदिन्द्र प्रणीतिषूत प्रशस्तिरद्रिवः ।

8.006.22c यज्ञो वितन्तसाय्यः ॥

8.006.23a आ न इन्द्र महीमिषं पुरं न दर्षि गोमतीम् ।

8.006.23c उत प्रजां सुवीर्यम् ॥

8.006.24a उत त्यदाश्वश्व्यं यदिन्द्र नाहुषीष्वा ।

8.006.24c अग्रे विक्षु प्रदीदयत् ॥

8.006.25a अभि व्रजं न तत्निषे सूर उपाकचक्षसम् ।

8.006.25c यदिन्द्र मृळयासि नः ॥

8.006.26a यदङ्ग तविषीयस इन्द्र प्रराजसि क्षितीः ।

8.006.26c महाँ अपार ओजसा ॥

8.006.27a तं त्वा हविष्मतीर्विश उप ब्रुवत ऊतये ।

8.006.27c उरुज्रयसमिन्दुभिः ॥

8.006.28a उपह्वरे गिरीणां संगथे च नदीनाम् ।

8.006.28c धिया विप्रो अजायत ॥

8.006.29a अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति ।

8.006.29c यतो विपान एजति ॥

8.006.30a आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् ।

8.006.30c परो यदिध्यते दिवा ॥

8.006.31a कण्वास इन्द्र ते मतिं विश्वे वर्धन्ति पौंस्यम् ।

8.006.31c उतो शविष्ठ वृष्ण्यम् ॥

8.006.32a इमां म इन्द्र सुष्टुतिं जुषस्व प्र सु मामव ।

8.006.32c उत प्र वर्धया मतिम् ॥

8.006.33a उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः ।

8.006.33c विप्रा अतक्ष्म जीवसे ॥

8.006.34a अभि कण्वा अनूषतापो न प्रवता यतीः ।

8.006.34c इन्द्रं वनन्वती मतिः ॥

8.006.35a इन्द्रमुक्थानि वावृधुः समुद्रमिव सिन्धवः ।

8.006.35c अनुत्तमन्युमजरम् ॥

8.006.36a आ नो याहि परावतो हरिभ्यां हर्यताभ्याम् ।

8.006.36c इममिन्द्र सुतं पिब ॥

8.006.37a त्वामिद्वृत्रहन्तम जनासो वृक्तबर्हिषः ।

8.006.37c हवन्ते वाजसातये ॥

8.006.38a अनु त्वा रोदसी उभे चक्रं न वर्त्येतशम् ।

8.006.38c अनु सुवानास इन्दवः ॥

8.006.39a मन्दस्वा सु स्वर्णर उतेन्द्र शर्यणावति ।

8.006.39c मत्स्वा विवस्वतो मती ॥

8.006.40a वावृधान उप द्यवि वृषा वज्र्यरोरवीत् ।

8.006.40c वृत्रहा सोमपातमः ॥

8.006.41a ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा ।

8.006.41c इन्द्र चोष्कूयसे वसु ॥

8.006.42a अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः ।

8.006.42c शतं वहन्तु हरयः ॥

8.006.43a इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीम् ।

8.006.43c कण्वा उक्थेन वावृधुः ॥

8.006.44a इन्द्रमिद्विमहीनां मेधे वृणीत मर्त्यः ।

8.006.44c इन्द्रं सनिष्युरूतये ॥

8.006.45a अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी ।

8.006.45c सोमपेयाय वक्षतः ॥

8.006.46a शतमहं तिरिन्दिरे सहस्रं पर्शावा ददे ।

8.006.46c राधांसि याद्वानाम् ॥

8.006.47a त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ।

8.006.47c ददुष्पज्राय साम्ने ॥

8.006.48a उदानट् ककुहो दिवमुष्ट्राञ्चतुर्युजो ददत् ।

8.006.48c श्रवसा याद्वं जनम् ॥

8.007.01a प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् ।

8.007.01c वि पर्वतेषु राजथ ॥

8.007.02a यदङ्ग तविषीयवो यामं शुभ्रा अचिध्वम् ।

8.007.02c नि पर्वता अहासत ॥

8.007.03a उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः ।

8.007.03c धुक्षन्त पिप्युषीमिषम् ॥

8.007.04a वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान् ।

8.007.04c यद्यामं यान्ति वायुभिः ॥

8.007.05a नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे ।

8.007.05c महे शुष्माय येमिरे ॥

8.007.06a युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे ।

8.007.06c युष्मान्प्रयत्यध्वरे ॥

8.007.07a उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते ।

8.007.07c वाश्रा अधि ष्णुना दिवः ॥

8.007.08a सृजन्ति रश्मिमोजसा पन्थां सूर्याय यातवे ।

8.007.08c ते भानुभिर्वि तस्थिरे ॥

8.007.09a इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः ।

8.007.09c इमं मे वनता हवम् ॥

8.007.10a त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु ।

8.007.10c उत्सं कवन्धमुद्रिणम् ॥

8.007.11a मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे ।

8.007.11c आ तू न उप गन्तन ॥

8.007.12a यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे ।

8.007.12c उत प्रचेतसो मदे ॥

8.007.13a आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् ।

8.007.13c इयर्ता मरुतो दिवः ॥

8.007.14a अधीव यद्गिरीणां यामं शुभ्रा अचिध्वम् ।

8.007.14c सुवानैर्मन्दध्व इन्दुभिः ॥

8.007.15a एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः ।

8.007.15c अदाभ्यस्य मन्मभिः ॥

8.007.16a ये द्रप्सा इव रोदसी धमन्त्यनु वृष्टिभिः ।

8.007.16c उत्सं दुहन्तो अक्षितम् ॥

8.007.17a उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः ।

8.007.17c उत्स्तोमैः पृश्निमातरः ॥

8.007.18a येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् ।

8.007.18c राये सु तस्य धीमहि ॥

8.007.19a इमा उ वः सुदानवो घृतं न पिप्युषीरिषः ।

8.007.19c वर्धान्काण्वस्य मन्मभिः ॥

8.007.20a क्व नूनं सुदानवो मदथा वृक्तबर्हिषः ।

8.007.20c ब्रह्मा को वः सपर्यति ॥

8.007.21a नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः ।

8.007.21c शर्धाँ ऋतस्य जिन्वथ ॥

8.007.22a समु त्ये महतीरपः सं क्षोणी समु सूर्यम् ।

8.007.22c सं वज्रं पर्वशो दधुः ॥

8.007.23a विं वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः ।

8.007.23c चक्राणा वृष्णि पौंस्यम् ॥

8.007.24a अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम् ।

8.007.24c अन्विन्द्रं वृत्रतूर्ये ॥

8.007.25a विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः ।

8.007.25c शुभ्रा व्यञ्जत श्रिये ॥

8.007.26a उशना यत्परावत उक्ष्णो रन्ध्रमयातन ।

8.007.26c द्यौर्न चक्रदद्भिया ॥

8.007.27a आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः ।

8.007.27c देवास उप गन्तन ॥

8.007.28a यदेषां पृषती रथे प्रष्टिर्वहति रोहितः ।

8.007.28c यान्ति शुभ्रा रिणन्नपः ॥

8.007.29a सुषोमे शर्यणावत्यार्जीके पस्त्यावति ।

8.007.29c ययुर्निचक्रया नरः ॥

8.007.30a कदा गच्छाथ मरुत इत्था विप्रं हवमानम् ।

8.007.30c मार्डीकेभिर्नाधमानम् ॥

8.007.31a कद्ध नूनं कधप्रियो यदिन्द्रमजहातन ।

8.007.31c को वः सखित्व ओहते ॥

8.007.32a सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः ।

8.007.32c स्तुषे हिरण्यवाशीभिः ॥

8.007.33a ओ षु वृष्णः प्रयज्यूना नव्यसे सुविताय ।

8.007.33c ववृत्यां चित्रवाजान् ॥

8.007.34a गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः ।

8.007.34c पर्वताश्चिन्नि येमिरे ॥

8.007.35a आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः ।

8.007.35c धातार स्तुवते वयः ॥

8.007.36a अग्निर्हि जानि पूर्व्यश्छन्दो न सूरो अर्चिषा ।

8.007.36c ते भानुभिर्वि तस्थिरे ॥

8.008.01a आ नो विश्वाभिरूतिभिरश्विना गच्छतं युवम् ।

8.008.01c दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु ॥

8.008.02a आ नूनं यातमश्विना रथेन सूर्यत्वचा ।

8.008.02c भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥

8.008.03a आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः ।

8.008.03c पिबाथो अश्विना मधु कण्वानां सवने सुतम् ॥

8.008.04a आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया ।

8.008.04c पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु ॥

8.008.05a आ नो यातमुपश्रुत्यश्विना सोमपीतये ।

8.008.05c स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिर्नरा ॥

8.008.06a यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।

8.008.06c आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥

8.008.07a दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा ।

8.008.07c धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥

8.008.08a किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना ।

8.008.08c पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥

8.008.09a आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना ।

8.008.09c अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥

8.008.10a आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू ।

8.008.10c विश्वान्यश्विना युवं प्र धीतान्यगच्छतम् ॥

8.008.11a अतः सहस्रनिर्णिजा रथेना यातमश्विना ।

8.008.11c वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः ॥

8.008.12a पुरुमन्द्रा पुरूवसू मनोतरा रयीणाम् ।

8.008.12c स्तोमं मे अश्विनाविममभि वह्नी अनूषाताम् ॥

8.008.13a आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया ।

8.008.13c कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥

8.008.14a यन्नासत्या परावति यद्वा स्थो अध्यम्बरे ।

8.008.14c अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥

8.008.15a यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।

8.008.15c तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतम् ॥

8.008.16a प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवम् ।

8.008.16c यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥

8.008.17a आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।

8.008.17c कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥

8.008.18a आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।

8.008.18c राजन्तावध्वराणामश्विना यामहूतिषु ॥

8.008.19a आ नो गन्तं मयोभुवाश्विना शम्भुवा युवम् ।

8.008.19c यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥

8.008.20a याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजम् ।

8.008.20c याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥

8.008.21a याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।

8.008.21c ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥

8.008.22a प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।

8.008.22c पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥

8.008.23a त्रीणि पदान्यश्विनोराविः सान्ति गुहा परः ।

8.008.23c कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥

8.009.01a आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।

8.009.01c प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥

8.009.02a यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु ।

8.009.02c नृम्णं तद्धत्तमश्विना ॥

8.009.03a ये वां दंसांस्यश्विना विप्रासः परिमामृशुः ।

8.009.03c एवेत्काण्वस्य बोधतम् ॥

8.009.04a अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।

8.009.04c अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥

8.009.05a यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम् ।

8.009.05c तेन माविष्टमश्विना ॥

8.009.06a यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।

8.009.06c अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥

8.009.07a आ नूनमश्विनोरृषि स्तोमं चिकेत वामया ।

8.009.07c आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥

8.009.08a आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।

8.009.08c आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥

8.009.09a यदद्य वां नासत्योक्थैराचुच्युवीमहि ।

8.009.09c यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतम् ॥

8.009.10a यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव ।

8.009.10c पृथी यद्वां वैन्यः सादनेष्वेवेदतो अश्विना चेतयेथाम् ॥

8.009.11a यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा ।

8.009.11c वर्तिस्तोकाय तनयाय यातम् ॥

8.009.12a यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा ।

8.009.12c यदादित्येभिरृभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥

8.009.13a यदद्याश्विनावहं हुवेय वाजसातये ।

8.009.13c यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥

8.009.14a आ नूनं यातमश्विनेमा हव्यानि वां हिता ।

8.009.14c इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥

8.009.15a यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।

8.009.15c तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥

8.009.16a अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।

8.009.16c व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥

8.009.17a प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।

8.009.17c प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥

8.009.18a यदुषो यासि भानुना सं सूर्येण रोचसे ।

8.009.18c आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥

8.009.19a यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।

8.009.19c यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥

8.009.20a प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे ।

8.009.20c प्र दक्षाय प्रचेतसा ॥

8.009.21a यन्नूनं धीभिरश्विना पितुर्योना निषीदथः ।

8.009.21c यद्वा सुम्नेभिरुक्थ्या ॥

8.010.01a यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः ।

8.010.01c यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥

8.010.02a यद्वा यज्ञं मनवे सम्मिमिक्षथुरेवेत्काण्वस्य बोधतम् ।

8.010.02c बृहस्पतिं विश्वान्देवाँ अहं हुव इन्द्राविष्णू अश्विनावाशुहेषसा ॥

8.010.03a त्या न्वश्विना हुवे सुदंससा गृभे कृता ।

8.010.03c ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यम् ॥

8.010.04a ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।

8.010.04c ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥

8.010.05a यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।

8.010.05c यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥

8.010.06a यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।

8.010.06c यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥

8.011.01a त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ।

8.011.01c त्वं यज्ञेष्वीड्यः ॥

8.011.02a त्वमसि प्रशस्यो विदथेषु सहन्त्य ।

8.011.02c अग्ने रथीरध्वराणाम् ॥

8.011.03a स त्वमस्मदप द्विषो युयोधि जातवेदः ।

8.011.03c अदेवीरग्ने अरातीः ॥

8.011.04a अन्ति चित्सन्तमह यज्ञं मर्तस्य रिपोः ।

8.011.04c नोप वेषि जातवेदः ॥

8.011.05a मर्ता अमर्त्यस्य ते भूरि नाम मनामहे ।

8.011.05c विप्रासो जातवेदसः ॥

8.011.06a विप्रं विप्रासोऽवसे देवं मर्तास ऊतये ।

8.011.06c अग्निं गीर्भिर्हवामहे ॥

8.011.07a आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।

8.011.07c अग्ने त्वांकामया गिरा ॥

8.011.08a पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः ।

8.011.08c समत्सु त्वा हवामहे ॥

8.011.09a समत्स्वग्निमवसे वाजयन्तो हवामहे ।

8.011.09c वाजेषु चित्रराधसम् ॥

8.011.10a प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि ।

8.011.10c स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च सौभगमा यजस्व ॥

8.012.01a य इन्द्र सोमपातमो मदः शविष्ठ चेतति ।

8.012.01c येना हंसि न्यत्रिणं तमीमहे ॥

8.012.02a येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् ।

8.012.02c येना समुद्रमाविथा तमीमहे ॥

8.012.03a येन सिन्धुं महीरपो रथाँ इव प्रचोदयः ।

8.012.03c पन्थामृतस्य यातवे तमीमहे ॥

8.012.04a इमं स्तोममभिष्टये घृतं न पूतमद्रिवः ।

8.012.04c येना नु सद्य ओजसा ववक्षिथ ॥

8.012.05a इमं जुषस्व गिर्वणः समुद्र इव पिन्वते ।

8.012.05c इन्द्र विश्वाभिरूतिभिर्ववक्षिथ ॥

8.012.06a यो नो देवः परावतः सखित्वनाय मामहे ।

8.012.06c दिवो न वृष्टिं प्रथयन्ववक्षिथ ॥

8.012.07a ववक्षुरस्य केतवो उत वज्रो गभस्त्योः ।

8.012.07c यत्सूर्यो न रोदसी अवर्धयत् ॥

8.012.08a यदि प्रवृद्ध सत्पते सहस्रं महिषाँ अघः ।

8.012.08c आदित्त इन्द्रियं महि प्र वावृधे ॥

8.012.09a इन्द्रः सूर्यस्य रश्मिभिर्न्यर्शसानमोषति ।

8.012.09c अग्निर्वनेव सासहिः प्र वावृधे ॥

8.012.10a इयं त ऋत्वियावती धीतिरेति नवीयसी ।

8.012.10c सपर्यन्ती पुरुप्रिया मिमीत इत् ॥

8.012.11a गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक् ।

8.012.11c स्तोमैरिन्द्रस्य वावृधे मिमीत इत् ॥

8.012.12a सनिर्मित्रस्य पप्रथ इन्द्रः सोमस्य पीतये ।

8.012.12c प्राची वाशीव सुन्वते मिमीत इत् ॥

8.012.13a यं विप्रा उक्थवाहसोऽभिप्रमन्दुरायवः ।

8.012.13c घृतं न पिप्य आसन्यृतस्य यत् ॥

8.012.14a उत स्वराजे अदिति स्तोममिन्द्राय जीजनत् ।

8.012.14c पुरुप्रशस्तमूतय ऋतस्य यत् ॥

8.012.15a अभि वह्नय ऊतयेऽनूषत प्रशस्तये ।

8.012.15c न देव विव्रता हरी ऋतस्य यत् ॥

8.012.16a यत्सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये ।

8.012.16c यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥

8.012.17a यद्वा शक्र परावति समुद्रे अधि मन्दसे ।

8.012.17c अस्माकमित्सुते रणा समिन्दुभिः ॥

8.012.18a यद्वासि सुन्वतो वृधो यजमानस्य सत्पते ।

8.012.18c उक्थे वा यस्य रण्यसि समिन्दुभिः ॥

8.012.19a देवंदेवं वोऽवस इन्द्रमिन्द्रं गृणीषणि ।

8.012.19c अधा यज्ञाय तुर्वणे व्यानशुः ॥

8.012.20a यज्ञेभिर्यज्ञवाहसं सोमेभिः सोमपातमम् ।

8.012.20c होत्राभिरिन्द्रं वावृधुर्व्यानशुः ॥

8.012.21a महीरस्य प्रणीतयः पूर्वीरुत प्रशस्तयः ।

8.012.21c विश्वा वसूनि दाशुषे व्यानशुः ॥

8.012.22a इन्द्रं वृत्राय हन्तवे देवासो दधिरे पुरः ।

8.012.22c इन्द्रं वाणीरनूषता समोजसे ॥

8.012.23a महान्तं महिना वयं स्तोमेभिर्हवनश्रुतम् ।

8.012.23c अर्कैरभि प्र णोनुमः समोजसे ॥

8.012.24a न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम् ।

8.012.24c अमादिदस्य तित्विषे समोजसः ॥

8.012.25a यदिन्द्र पृतनाज्ये देवास्त्वा दधिरे पुरः ।

8.012.25c आदित्ते हर्यता हरी ववक्षतुः ॥

8.012.26a यदा वृत्रं नदीवृतं शवसा वज्रिन्नवधीः ।

8.012.26c आदित्ते हर्यता हरी ववक्षतुः ॥

8.012.27a यदा ते विष्णुरोजसा त्रीणि पदा विचक्रमे ।

8.012.27c आदित्ते हर्यता हरी ववक्षतुः ॥

8.012.28a यदा ते हर्यता हरी वावृधाते दिवेदिवे ।

8.012.28c आदित्ते विश्वा भुवनानि येमिरे ॥

8.012.29a यदा ते मारुतीर्विशस्तुभ्यमिन्द्र नियेमिरे ।

8.012.29c आदित्ते विश्वा भुवनानि येमिरे ॥

8.012.30a यदा सूर्यममुं दिवि शुक्रं ज्योतिरधारयः ।

8.012.30c आदित्ते विश्वा भुवनानि येमिरे ॥

8.012.31a इमां त इन्द्र सुष्टुतिं विप्र इयर्ति धीतिभिः ।

8.012.31c जामिं पदेव पिप्रतीं प्राध्वरे ॥

8.012.32a यदस्य धामनि प्रिये समीचीनासो अस्वरन् ।

8.012.32c नाभा यज्ञस्य दोहना प्राध्वरे ॥

8.012.33a सुवीर्यं स्वश्व्यं सुगव्यमिन्द्र दद्धि नः ।

8.012.33c होतेव पूर्वचित्तये प्राध्वरे ॥

8.013.01a इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम् ।

8.013.01c विदे वृधस्य दक्षसो महान्हि षः ॥

8.013.02a स प्रथमे व्योमनि देवानां सदने वृधः ।

8.013.02c सुपारः सुश्रवस्तमः समप्सुजित् ॥

8.013.03a तमह्वे वाजसातय इन्द्रं भराय शुष्मिणम् ।

8.013.03c भवा नः सुम्ने अन्तमः सखा वृधे ॥

8.013.04a इयं त इन्द्र गिर्वणो रातिः क्षरति सुन्वतः ।

8.013.04c मन्दानो अस्य बर्हिषो वि राजसि ॥

8.013.05a नूनं तदिन्द्र दद्धि नो यत्त्वा सुन्वन्त ईमहे ।

8.013.05c रयिं नश्चित्रमा भरा स्वर्विदम् ॥

8.013.06a स्तोता यत्ते विचर्षणिरतिप्रशर्धयद्गिरः ।

8.013.06c वया इवानु रोहते जुषन्त यत् ॥

8.013.07a प्रत्नवज्जनया गिरः शृणुधी जरितुर्हवम् ।

8.013.07c मदेमदे ववक्षिथा सुकृत्वने ॥

8.013.08a क्रीळन्त्यस्य सूनृता आपो न प्रवता यतीः ।

8.013.08c अया धिया य उच्यते पतिर्दिवः ॥

8.013.09a उतो पतिर्य उच्यते कृष्टीनामेक इद्वशी ।

8.013.09c नमोवृधैरवस्युभिः सुते रण ॥

8.013.10a स्तुहि श्रुतं विपश्चितं हरी यस्य प्रसक्षिणा ।

8.013.10c गन्तारा दाशुषो गृहं नमस्विनः ॥

8.013.11a तूतुजानो महेमतेऽश्वेभिः प्रुषितप्सुभिः ।

8.013.11c आ याहि यज्ञमाशुभिः शमिद्धि ते ॥

8.013.12a इन्द्र शविष्ठ सत्पते रयिं गृणत्सु धारय ।

8.013.12c श्रवः सूरिभ्यो अमृतं वसुत्वनम् ॥

8.013.13a हवे त्वा सूर उदिते हवे मध्यंदिने दिवः ।

8.013.13c जुषाण इन्द्र सप्तिभिर्न आ गहि ॥

8.013.14a आ तू गहि प्र तु द्रव मत्स्वा सुतस्य गोमतः ।

8.013.14c तन्तुं तनुष्व पूर्व्यं यथा विदे ॥

8.013.15a यच्छक्रासि परावति यदर्वावति वृत्रहन् ।

8.013.15c यद्वा समुद्रे अन्धसोऽवितेदसि ॥

8.013.16a इन्द्रं वर्धन्तु नो गिर इन्द्रं सुतास इन्दवः ।

8.013.16c इन्द्रे हविष्मतीर्विशो अराणिषुः ॥

8.013.17a तमिद्विप्रा अवस्यवः प्रवत्वतीभिरूतिभिः ।

8.013.17c इन्द्रं क्षोणीरवर्धयन्वया इव ॥

8.013.18a त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।

8.013.18c तमिद्वर्धन्तु नो गिरः सदावृधम् ॥

8.013.19a स्तोता यत्ते अनुव्रत उक्थान्यृतुथा दधे ।

8.013.19c शुचिः पावक उच्यते सो अद्भुतः ॥

8.013.20a तदिद्रुद्रस्य चेतति यह्वं प्रत्नेषु धामसु ।

8.013.20c मनो यत्रा वि तद्दधुर्विचेतसः ॥

8.013.21a यदि मे सख्यमावर इमस्य पाह्यन्धसः ।

8.013.21c येन विश्वा अति द्विषो अतारिम ॥

8.013.22a कदा त इन्द्र गिर्वण स्तोता भवाति शंतमः ।

8.013.22c कदा नो गव्ये अश्व्ये वसौ दधः ॥

8.013.23a उत ते सुष्टुता हरी वृषणा वहतो रथम् ।

8.013.23c अजुर्यस्य मदिन्तमं यमीमहे ॥

8.013.24a तमीमहे पुरुष्टुतं यह्वं प्रत्नाभिरूतिभिः ।

8.013.24c नि बर्हिषि प्रिये सददध द्विता ॥

8.013.25a वर्धस्वा सु पुरुष्टुत ऋषिष्टुताभिरूतिभिः ।

8.013.25c धुक्षस्व पिप्युषीमिषमवा च नः ॥

8.013.26a इन्द्र त्वमवितेदसीत्था स्तुवतो अद्रिवः ।

8.013.26c ऋतादियर्मि ते धियं मनोयुजम् ॥

8.013.27a इह त्या सधमाद्या युजानः सोमपीतये ।

8.013.27c हरी इन्द्र प्रतद्वसू अभि स्वर ॥

8.013.28a अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम् ।

8.013.28c उतो मरुत्वतीर्विशो अभि प्रयः ॥

8.013.29a इमा अस्य प्रतूर्तयः पदं जुषन्त यद्दिवि ।

8.013.29c नाभा यज्ञस्य सं दधुर्यथा विदे ॥

8.013.30a अयं दीर्घाय चक्षसे प्राचि प्रयत्यध्वरे ।

8.013.30c मिमीते यज्ञमानुषग्विचक्ष्य ॥

8.013.31a वृषायमिन्द्र ते रथ उतो ते वृषणा हरी ।

8.013.31c वृषा त्वं शतक्रतो वृषा हवः ॥

8.013.32a वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ।

8.013.32c वृषा यज्ञो यमिन्वसि वृषा हवः ॥

8.013.33a वृषा त्वा वृषणं हुवे वज्रिञ्चित्राभिरूतिभिः ।

8.013.33c वावन्थ हि प्रतिष्टुतिं वृषा हवः ॥

8.014.01a यदिन्द्राहं यथा त्वमीशीय वस्व एक इत् ।

8.014.01c स्तोता मे गोषखा स्यात् ॥

8.014.02a शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे ।

8.014.02c यदहं गोपतिः स्याम् ॥

8.014.03a धेनुष्ट इन्द्र सूनृता यजमानाय सुन्वते ।

8.014.03c गामश्वं पिप्युषी दुहे ॥

8.014.04a न ते वर्तास्ति राधस इन्द्र देवो न मर्त्यः ।

8.014.04c यद्दित्ससि स्तुतो मघम् ॥

8.014.05a यज्ञ इन्द्रमवर्धयद्यद्भूमिं व्यवर्तयत् ।

8.014.05c चक्राण ओपशं दिवि ॥

8.014.06a वावृधानस्य ते वयं विश्वा धनानि जिग्युषः ।

8.014.06c ऊतिमिन्द्रा वृणीमहे ॥

8.014.07a व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना ।

8.014.07c इन्द्रो यदभिनद्वलम् ॥

8.014.08a उद्गा आजदङ्गिरोभ्य आविष्कृण्वन्गुहा सतीः ।

8.014.08c अर्वाञ्चं नुनुदे वलम् ॥

8.014.09a इन्द्रेण रोचना दिवो दृळ्हानि दृंहितानि च ।

8.014.09c स्थिराणि न पराणुदे ॥

8.014.10a अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते ।

8.014.10c वि ते मदा अराजिषुः ॥

8.014.11a त्वं हि स्तोमवर्धन इन्द्रास्युक्थवर्धनः ।

8.014.11c स्तोतृणामुत भद्रकृत् ॥

8.014.12a इन्द्रमित्केशिना हरी सोमपेयाय वक्षतः ।

8.014.12c उप यज्ञं सुराधसम् ॥

8.014.13a अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।

8.014.13c विश्वा यदजय स्पृधः ॥

8.014.14a मायाभिरुत्सिसृप्सत इन्द्र द्यामारुरुक्षतः ।

8.014.14c अव दस्यूँरधूनुथाः ॥

8.014.15a असुन्वामिन्द्र संसदं विषूचीं व्यनाशयः ।

8.014.15c सोमपा उत्तरो भवन् ॥

8.015.01a तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम् ।

8.015.01c इन्द्रं गीर्भिस्तविषमा विवासत ॥

8.015.02a यस्य द्विबर्हसो बृहत्सहो दाधार रोदसी ।

8.015.02c गिरीँरज्राँ अपः स्वर्वृषत्वना ॥

8.015.03a स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे ।

8.015.03c इन्द्र जैत्रा श्रवस्या च यन्तवे ॥

8.015.04a तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम् ।

8.015.04c उ लोककृत्नुमद्रिवो हरिश्रियम् ॥

8.015.05a येन ज्योतींष्यायवे मनवे च विवेदिथ ।

8.015.05c मन्दानो अस्य बर्हिषो वि राजसि ॥

8.015.06a तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा ।

8.015.06c वृषपत्नीरपो जया दिवेदिवे ॥

8.015.07a तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् ।

8.015.07c वज्रं शिशाति धिषणा वरेण्यम् ॥

8.015.08a तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः ।

8.015.08c त्वामापः पर्वतासश्च हिन्विरे ॥

8.015.09a त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।

8.015.09c त्वां शर्धो मदत्यनु मारुतम् ॥

8.015.10a त्वं वृषा जनानां मंहिष्ठ इन्द्र जज्ञिषे ।

8.015.10c सत्रा विश्वा स्वपत्यानि दधिषे ॥

8.015.11a सत्रा त्वं पुरुष्टुतँ एको वृत्राणि तोशसे ।

8.015.11c नान्य इन्द्रात्करणं भूय इन्वति ॥

8.015.12a यदिन्द्र मन्मशस्त्वा नाना हवन्त ऊतये ।

8.015.12c अस्माकेभिर्नृभिरत्रा स्वर्जय ॥

8.015.13a अरं क्षयाय नो महे विश्वा रूपाण्याविशन्।

8.015.13c इन्द्रं जैत्राय हर्षया शचीपतिम्॥

8.016.01a प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः।

8.016.01c नरं नृषाहं मंहिष्ठम्॥

8.016.02a यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या।

8.016.02c अपामवो न समुद्रे॥

8.016.03a तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम्।

8.016.03c महो वाजिनं सनिभ्यः॥

8.016.04a यस्यानूना गभीरा मदा उरवस्तरुत्राः।

8.016.04c हर्षुमन्तः शूरसातौ॥

8.016.05a तमिद्धनेषु हितेष्वधिवाकाय हवन्ते।

8.016.05c येषामिन्द्रस्ते जयन्ति॥

8.016.06a तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः।

8.016.06c एष इन्द्रो वरिवस्कृत्॥

8.016.07a इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरू पुरुहूतः।

8.016.07c महान्महीभिः शचीभिः॥

8.016.08a स स्तोम्यः स हव्यः सत्यः सत्वा तुविकूर्मिः।

8.016.08c एकश्चित्सन्नभिभूतिः ॥

8.016.09a तमर्केभिस्तं सामभिस्तं गायत्रैश्चर्षणयः ।

8.016.09c इन्द्रं वर्धन्ति क्षितयः ॥

8.016.10a प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु ।

8.016.10c सासह्वांसं युधामित्रान् ॥

8.016.11a स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः ।

8.016.11c इन्द्रो विश्वा अति द्विषः ॥

8.016.12a स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च ।

8.016.12c अच्छा च नः सुम्नं नेषि ॥

8.017.01a आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।

8.017.01c एदं बर्हिः सदो मम ॥

8.017.02a आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना ।

8.017.02c उप ब्रह्माणि नः शृणु ॥

8.017.03a ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः ।

8.017.03c सुतावन्तो हवामहे ॥

8.017.04a आ नो याहि सुतावतोऽस्माकं सुष्टुतीरुप ।

8.017.04c पिबा सु शिप्रिन्नन्धसः ॥

8.017.05a आ ते सिञ्चामि कुक्ष्योरनु गात्रा वि धावतु ।

8.017.05c गृभाय जिह्वया मधु ॥

8.017.06a स्वादुष्टे अस्तु संसुदे मधुमान्तन्वे३ तव ।

8.017.06c सोमः शमस्तु ते हृदे ॥

8.017.07a अयमु त्वा विचर्षणे जनीरिवाभि संवृतः ।

8.017.07c प्र सोम इन्द्र सर्पतु ॥

8.017.08a तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे ।

8.017.08c इन्द्रो वृत्राणि जिघ्नते ॥

8.017.09a इन्द्र प्रेहि पुरस्त्वं विश्वस्येशान ओजसा ।

8.017.09c वृत्राणि वृत्रहञ्जहि ॥

8.017.10a दीर्घस्ते अस्त्वङ्कुशो येना वसु प्रयच्छसि ।

8.017.10c यजमानाय सुन्वते ॥

8.017.11a अयं त इन्द्र सोमो निपूतो अधि बर्हिषि ।

8.017.11c एहीमस्य द्रवा पिब ॥

8.017.12a शाचिगो शाचिपूजनायं रणाय ते सुतः ।

8.017.12c आखण्डल प्र हूयसे ॥

8.017.13a यस्ते शृङ्गवृषो नपात्प्रणपात्कुण्डपाय्यः ।

8.017.13c न्यस्मिन्दध्र आ मनः ॥

8.017.14a वास्तोष्पते ध्रुवा स्थूणांसत्रं सोम्यानाम् ।

8.017.14c द्रप्सो भेत्ता पुरां शश्वतीनामिन्द्रो मुनीनां सखा ॥

8.017.15a पृदाकुसानुर्यजतो गवेषण एकः सन्नभि भूयसः ।

8.017.15c भूर्णिमश्वं नयत्तुजा पुरो गृभेन्द्रं सोमस्य पीतये ॥

8.018.01a इदं ह नूनमेषां सुम्नं भिक्षेत मर्त्यः ।

8.018.01c आदित्यानामपूर्व्यं सवीमनि ॥

8.018.02a अनर्वाणो ह्येषां पन्था आदित्यानाम् ।

8.018.02c अदब्धाः सन्ति पायवः सुगेवृधः ॥

8.018.03a तत्सु नः सविता भगो वरुणो मित्रो अर्यमा ।

8.018.03c शर्म यच्छन्तु सप्रथो यदीमहे ॥

8.018.04a देवेभिर्देव्यदितेऽरिष्टभर्मन्ना गहि ।

8.018.04c स्मत्सूरिभिः पुरुप्रिये सुशर्मभिः ॥

8.018.05a ते हि पुत्रासो अदितेर्विदुर्द्वेषांसि योतवे ।

8.018.05c अंहोश्चिदुरुचक्रयोऽनेहसः ॥

8.018.06a अदितिर्नो दिवा पशुमदितिर्नक्तमद्वयाः ।

8.018.06c अदितिः पात्वंहसः सदावृधा ॥

8.018.07a उत स्या नो दिवा मतिरदितिरूत्या गमत् ।

8.018.07c सा शंताति मयस्करदप स्निधः ॥

8.018.08a उत त्या दैव्या भिषजा शं नः करतो अश्विना ।

8.018.08c युयुयातामितो रपो अप स्निधः ॥

8.018.09a शमग्निरग्निभिः करच्छं नस्तपतु सूर्यः ।

8.018.09c शं वातो वात्वरपा अप स्निधः ॥

8.018.10a अपामीवामप स्निधमप सेधत दुर्मतिम् ।

8.018.10c आदित्यासो युयोतना नो अंहसः ॥

8.018.11a युयोता शरुमस्मदाँ आदित्यास उतामतिम् ।

8.018.11c ऋधग्द्वेषः कृणुत विश्ववेदसः ॥

8.018.12a तत्सु नः शर्म यच्छतादित्या यन्मुमोचति ।

8.018.12c एनस्वन्तं चिदेनसः सुदानवः ॥

8.018.13a यो नः कश्चिद्रिरिक्षति रक्षस्त्वेन मर्त्यः ।

8.018.13c स्वैः ष एवै रिरिषीष्ट युर्जनः ॥

8.018.14a समित्तमघमश्नवद्दुःशंसं मर्त्यं रिपुम् ।

8.018.14c यो अस्मत्रा दुर्हणावाँ उप द्वयुः ॥

8.018.15a पाकत्रा स्थन देवा हृत्सु जानीथ मर्त्यम् ।

8.018.15c उप द्वयुं चाद्वयुं च वसवः ॥

8.018.16a आ शर्म पर्वतानामोतापां वृणीमहे ।

8.018.16c द्यावाक्षामारे अस्मद्रपस्कृतम् ॥

8.018.17a ते नो भद्रेण शर्मणा युष्माकं नावा वसवः ।

8.018.17c अति विश्वानि दुरिता पिपर्तन ॥

8.018.18a तुचे तनाय तत्सु नो द्राघीय आयुर्जीवसे ।

8.018.18c आदित्यासः सुमहसः कृणोतन ॥

8.018.19a यज्ञो हीळो वो अन्तर आदित्या अस्ति मृळत ।

8.018.19c युष्मे इद्वो अपि ष्मसि सजात्ये ॥

8.018.20a बृहद्वरूथं मरुतां देवं त्रातारमश्विना ।

8.018.20c मित्रमीमहे वरुणं स्वस्तये ॥

8.018.21a अनेहो मित्रार्यमन्नृवद्वरुण शंस्यम् ।

8.018.21c त्रिवरूथं मरुतो यन्त नश्छर्दिः ॥

8.018.22a ये चिद्धि मृत्युबन्धव आदित्या मनवः स्मसि ।

8.018.22c प्र सू न आयुर्जीवसे तिरेतन ॥

8.019.01a तं गूर्धया स्वर्णरं देवासो देवमरतिं दधन्विरे ।

8.019.01c देवत्रा हव्यमोहिरे ॥

8.019.02a विभूतरातिं विप्र चित्रशोचिषमग्निमीळिष्व यन्तुरम् ।

8.019.02c अस्य मेधस्य सोम्यस्य सोभरे प्रेमध्वराय पूर्व्यम् ॥

8.019.03a यजिष्ठं त्वा ववृमहे देवं देवत्रा होतारममर्त्यम् ।

8.019.03c अस्य यज्ञस्य सुक्रतुम् ॥

8.019.04a ऊर्जो नपातं सुभगं सुदीदितिमग्निं श्रेष्ठशोचिषम् ।

8.019.04c स नो मित्रस्य वरुणस्य सो अपामा सुम्नं यक्षते दिवि ॥

8.019.05a यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये ।

8.019.05c यो नमसा स्वध्वरः ॥

8.019.06a तस्येदर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः ।

8.019.06c न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥

8.019.07a स्वग्नयो वो अग्निभिः स्याम सूनो सहस ऊर्जां पते ।

8.019.07c सुवीरस्त्वमस्मयुः ॥

8.019.08a प्रशंसमानो अतिथिर्न मित्रियोऽग्नी रथो न वेद्यः ।

8.019.08c त्वे क्षेमासो अपि सन्ति साधवस्त्वं राजा रयीणाम् ॥

8.019.09a सो अद्धा दाश्वध्वरोऽग्ने मर्तः सुभग स प्रशंस्यः ।

8.019.09c स धीभिरस्तु सनिता ॥

8.019.10a यस्य त्वमूर्ध्वो अध्वराय तिष्ठसि क्षयद्वीरः स साधते ।

8.019.10c सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतम् ॥

8.019.11a यस्याग्निर्वपुर्गृहे स्तोमं चनो दधीत विश्ववार्यः ।

8.019.11c हव्या वा वेविषद्विषः ॥

8.019.12a विप्रस्य वा स्तुवतः सहसो यहो मक्षूतमस्य रातिषु ।

8.019.12c अवोदेवमुपरिमर्त्यं कृधि वसो विविदुषो वचः ॥

8.019.13a यो अग्निं हव्यदातिभिर्नमोभिर्वा सुदक्षमाविवासति ।

8.019.13c गिरा वाजिरशोचिषम् ॥

8.019.14a समिधा यो निशिती दाशददितिं धामभिरस्य मर्त्यः ।

8.019.14c विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ॥

8.019.15a तदग्ने द्युम्नमा भर यत्सासहत्सदने कं चिदत्रिणम् ।

8.019.15c मन्युं जनस्य दूढ्यः ॥

8.019.16a येन चष्टे वरुणो मित्रो अर्यमा येन नासत्या भगः ।

8.019.16c वयं तत्ते शवसा गातुवित्तमा इन्द्रत्वोता विधेमहि ॥

8.019.17a ते घेदग्ने स्वाध्यो३ ये त्वा विप्र निदधिरे नृचक्षसम् ।

8.019.17c विप्रासो देव सुक्रतुम् ॥

8.019.18a त इद्वेदिं सुभग त आहुतिं ते सोतुं चक्रिरे दिवि ।

8.019.18c त इद्वाजेभिर्जिग्युर्महद्धनं ये त्वे कामं न्येरिरे ॥

8.019.19a भद्रो नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः ।

8.019.19c भद्रा उत प्रशस्तयः ॥

8.019.20a भद्रं मनः कृणुष्व वृत्रतूर्ये येना समत्सु सासहः ।

8.019.20c अव स्थिरा तनुहि भूरि शर्धतां वनेमा ते अभिष्टिभिः ॥

8.019.21a ईळे गिरा मनुर्हितं यं देवा दूतमरतिं न्येरिरे ।

8.019.21c यजिष्ठं हव्यवाहनम् ॥

8.019.22a तिग्मजम्भाय तरुणाय राजते प्रयो गायस्यग्नये ।

8.019.22c यः पिंशते सूनृताभिः सुवीर्यमग्निर्घृतेभिराहुतः ॥

8.019.23a यदी घृतेभिराहुतो वाशीमग्निर्भरत उच्चाव च ।

8.019.23c असुर इव निर्णिजम् ॥

8.019.24a यो हव्यान्यैरयता मनुर्हितो देव आसा सुगन्धिना ।

8.019.24c विवासते वार्याणि स्वध्वरो होता देवो अमर्त्यः ॥

8.019.25a यदग्ने मर्त्यस्त्वं स्यामहं मित्रमहो अमर्त्यः ।

8.019.25c सहसः सूनवाहुत ॥

8.019.26a न त्वा रासीयाभिशस्तये वसो न पापत्वाय सन्त्य ।

8.019.26c न मे स्तोतामतीवा न दुर्हितः स्यादग्ने न पापया ॥

8.019.27a पितुर्न पुत्रः सुभृतो दुरोण आ देवाँ एतु प्र णो हविः ॥

8.019.28a तवाहमग्न ऊतिभिर्नेदिष्ठाभिः सचेय जोषमा वसो ।

8.019.28c सदा देवस्य मर्त्यः ॥

8.019.29a तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः ।

8.019.29c त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे ॥

8.019.30a प्र सो अग्ने तवोतिभिः सुवीराभिस्तिरते वाजभर्मभिः ।

8.019.30c यस्य त्वं सख्यमावरः ॥

8.019.31a तव द्रप्सो नीलवान्वाश ऋत्विय इन्धानः सिष्णवा ददे ।

8.019.31c त्वं महीनामुषसामसि प्रियः क्षपो वस्तुषु राजसि ॥

8.019.32a तमागन्म सोभरयः सहस्रमुष्कं स्वभिष्टिमवसे ।

8.019.32c सम्राजं त्रासदस्यवम् ॥

8.019.33a यस्य ते अग्ने अन्ये अग्नय उपक्षितो वया इव ।

8.019.33c विपो न द्युम्ना नि युवे जनानां तव क्षत्राणि वर्धयन् ॥

8.019.34a यमादित्यासो अद्रुहः पारं नयथ मर्त्यम् ।

8.019.34c मघोनां विश्वेषां सुदानवः ॥

8.019.35a यूयं राजानः कं चिच्चर्षणीसहः क्षयन्तं मानुषाँ अनु ।

8.019.35c वयं ते वो वरुण मित्रार्यमन्स्यामेदृतस्य रथ्यः ॥

8.019.36a अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् ।

8.019.36c मंहिष्ठो अर्यः सत्पतिः ॥

8.019.37a उत मे प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि ।

8.019.37c तिसृणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः ॥

8.020.01a आ गन्ता मा रिषण्यत प्रस्थावानो माप स्थाता समन्यवः ।

8.020.01c स्थिरा चिन्नमयिष्णवः ॥

8.020.02a वीळुपविभिर्मरुत ऋभुक्षण आ रुद्रासः सुदीतिभिः ।

8.020.02c इषा नो अद्या गता पुरुस्पृहो यज्ञमा सोभरीयवः ॥

8.020.03a विद्मा हि रुद्रियाणां शुष्ममुग्रं मरुतां शिमीवताम् ।

8.020.03c विष्णोरेषस्य मीळ्हुषाम् ॥

8.020.04a वि द्वीपानि पापतन्तिष्ठद्दुच्छुनोभे युजन्त रोदसी ।

8.020.04c प्र धन्वान्यैरत शुभ्रखादयो यदेजथ स्वभानवः ॥

8.020.05a अच्युता चिद्वो अज्मन्ना नानदति पर्वतासो वनस्पतिः ।

8.020.05c भूमिर्यामेषु रेजते ॥

8.020.06a अमाय वो मरुतो यातवे द्यौर्जिहीत उत्तरा बृहत् ।

8.020.06c यत्रा नरो देदिशते तनूष्वा त्वक्षांसि बाह्वोजसः ॥

8.020.07a स्वधामनु श्रियं नरो महि त्वेषा अमवन्तो वृषप्सवः ।

8.020.07c वहन्ते अह्रुतप्सवः ॥

8.020.08a गोभिर्वाणो अज्यते सोभरीणां रथे कोशे हिरण्यये ।

8.020.08c गोबन्धवः सुजातास इषे भुजे महान्तो न स्परसे नु ॥

8.020.09a प्रति वो वृषदञ्जयो वृष्णे शर्धाय मारुताय भरध्वम् ।

8.020.09c हव्या वृषप्रयाव्णे ॥

8.020.10a वृषणश्वेन मरुतो वृषप्सुना रथेन वृषनाभिना ।

8.020.10c आ श्येनासो न पक्षिणो वृथा नरो हव्या नो वीतये गत ॥

8.020.11a समानमञ्ज्येषां वि भ्राजन्ते रुक्मासो अधि बाहुषु ।

8.020.11c दविद्युतत्यृष्टयः ॥

8.020.12a त उग्रासो वृषण उग्रबाहवो नकिष्टनूषु येतिरे ।

8.020.12c स्थिरा धन्वान्यायुधा रथेषु वोऽनीकेष्वधि श्रियः ॥

8.020.13a येषामर्णो न सप्रथो नाम त्वेषं शश्वतामेकमिद्भुजे ।

8.020.13c वयो न पित्र्यं सहः ॥

8.020.14a तान्वन्दस्व मरुतस्ताँ उप स्तुहि तेषां हि धुनीनाम् ।

8.020.14c अराणां न चरमस्तदेषां दाना मह्ना तदेषाम् ॥

8.020.15a सुभगः स व ऊतिष्वास पूर्वासु मरुतो व्युष्टिषु ।

8.020.15c यो वा नूनमुतासति ॥

8.020.16a यस्य वा यूयं प्रति वाजिनो नर आ हव्या वीतये गथ ।

8.020.16c अभि ष द्युम्नैरुत वाजसातिभिः सुम्ना वो धूतयो नशत् ॥

8.020.17a यथा रुद्रस्य सूनवो दिवो वशन्त्यसुरस्य वेधसः ।

8.020.17c युवानस्तथेदसत् ॥

8.020.18a ये चार्हन्ति मरुतः सुदानवः स्मन्मीळ्हुषश्चरन्ति ये ।

8.020.18c अतश्चिदा न उप वस्यसा हृदा युवान आ ववृध्वम् ॥

8.020.19a यून ऊ षु नविष्ठया वृष्णः पावकाँ अभि सोभरे गिरा ।

8.020.19c गाय गा इव चर्कृषत् ॥

8.020.20a साहा ये सन्ति मुष्टिहेव हव्यो विश्वासु पृत्सु होतृषु ।
8.020.20c वृष्णश्चन्द्रान्न सुश्रवस्तमान्गिरा वन्दस्व मरुतो अह ॥
8.020.21a गावश्चिद्घा समन्यवः सजात्येन मरुतः सबन्धवः ।
8.020.21c रिहते ककुभो मिथः ॥
8.020.22a मर्तश्चिद्वो नृतवो रुक्मवक्षस उप भ्रातृत्वमायति ।
8.020.22c अधि नो गात मरुतः सदा हि व आपित्वमस्ति निध्रुवि ॥
8.020.23a मरुतो मारुतस्य न आ भेषजस्य वहता सुदानवः ।
8.020.23c यूयं सखायः सप्तयः ॥
8.020.24a याभिः सिन्धुमवथ याभिस्तूर्वथ याभिर्दशस्यथा क्रिविम् ।
8.020.24c मयो नो भूतोतिभिर्मयोभुवः शिवाभिरसचद्विषः ॥
8.020.25a यत्सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः ।
8.020.25c यत्पर्वतेषु भेषजम् ॥
8.020.26a विश्वं पश्यन्तो बिभृथा तनूष्वा तेना नो अधि वोचत ।
8.020.26c क्षमा रपो मरुत आतुरस्य न इष्कर्ता विह्रुतं पुनः ॥

8.021.01a वयमु त्वामपूर्व्य स्थूरं न कच्चिद्भरन्तोऽवस्यवः ।
8.021.01c वाजे चित्रं हवामहे ॥
8.021.02a उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।

8.021.02c त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥

8.021.03a आ याहीम इन्दवोऽश्वपते गोपत उर्वरापते ।

8.021.03c सोमं सोमपते पिब ॥

8.021.04a वयं हि त्वा बन्धुमन्तमबन्धवो विप्रास इन्द्र येमिम ।

8.021.04c या ते धामानि वृषभ तेभिरा गहि विश्वेभिः सोमपीतये ॥

8.021.05a सीदन्तस्ते वयो यथा गोश्रीते मधौ मदिरे विवक्षणे ।

8.021.05c अभि त्वामिन्द्र नोनुमः ॥

8.021.06a अच्छा च त्वैना नमसा वदामसि किं मुहुश्चिद्वि दीधयः ।

8.021.06c सन्ति कामासो हरिवो ददिष्ट्वं स्मो वयं सन्ति नो धियः ॥

8.021.07a नूत्ना इदिन्द्र ते वयमूती अभूम नहि नू ते अद्रिवः ।

8.021.07c विद्मा पुरा परीणसः ॥

8.021.08a विद्मा सखित्वमुत शूर भोज्यमा ते ता वज्रिन्नीमहे ।

8.021.08c उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति ॥

8.021.09a यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे ।

8.021.09c सखाय इन्द्रमूतये ॥

8.021.10a हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।

8.021.10c आ तु नः स वयति गव्यमश्व्यं स्तोतृभ्यो मघवा शतम् ॥

8.021.11a त्वया ह स्विद्युजा वयं प्रति श्वसन्तं वृषभ ब्रुवीमहि ।

8.021.11c संस्थे जनस्य गोमतः ॥

8.021.12a जयेम कारे पुरुहूत कारिणोऽभि तिष्ठेम दूढ्यः ।

8.021.12c नृभिर्वृत्रं हन्याम शूशुयाम चावेरिन्द्र प्र णो धियः ॥

8.021.13a अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।

8.021.13c युधेदापित्वमिच्छसे ॥

8.021.14a नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।

8.021.14c यदा कृणोषि नदनुं समूहस्यादित्पितेव हूयसे ॥

8.021.15a मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः ।

8.021.15c नि षदाम सचा सुते ॥

8.021.16a मा ते गोदत्र निरराम राधस इन्द्र मा ते गृहामहि ।

8.021.16c दृळ्हा चिदर्यः प्र मृशाभ्या भर न ते दामान आदभे ॥

8.021.17a इन्द्रो वा घेदियन्मघं सरस्वती वा सुभगा ददिर्वसु ।

8.021.17c त्वं वा चित्र दाशुषे ॥

8.021.18a चित्र इद्राजा राजका इदन्यके यके सरस्वतीमनु ।

8.021.18c पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ॥

8.022.01a ओ त्यमह्व आ रथमद्या दंसिष्ठमूतये ।

8.022.01c यमश्विना सुहवा रुद्रवर्तनी आ सूर्यायै तस्थथुः ॥

8.022.02a पूर्वायुषं सुहवं पुरुस्पृहं भुज्युं वाजेषु पूर्व्यम् ।

8.022.02c सचनावन्तं सुमतिभिः सोभरे विद्वेषसमनेहसम् ॥

8.022.03a इह त्या पुरुभूतमा देवा नमोभिरश्विना ।

8.022.03c अर्वाचीना स्ववसे करामहे गन्तारा दाशुषो गृहम् ॥

8.022.04a युवो रथस्य परि चक्रमीयत ईर्मान्यद्वामिषण्यति ।

8.022.04c अस्माँ अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु ॥

8.022.05a रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना ।

8.022.05c परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥

8.022.06a दशस्यन्ता मनवे पूर्व्यं दिवि यवं वृकेण कर्षथः ।

8.022.06c ता वामद्य सुमतिभिः शुभस्पती अश्विना प्र स्तुवीमहि ॥

8.022.07a उप नो वाजिनीवसू यातमृतस्य पथिभिः ।

8.022.07c येभिस्तृक्षिं वृषणा त्रासदस्यवं महे क्षत्राय जिन्वथः ॥

8.022.08a अयं वामद्रिभिः सुतः सोमो नरा वृषण्वसू ।

8.022.08c आ यातं सोमपीतये पिबतं दाशुषो गृहे ॥

8.022.09a आ हि रुहतमश्विना रथे कोशे हिरण्यये वृषण्वसू ।

8.022.09c युञ्जाथां पीवरीरिषः ॥

8.022.10a याभिः पक्थमवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।

8.022.10c ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥

8.022.11a यदध्रिगावो अध्रिगू इदा चिदह्नो अश्विना हवामहे ।

8.022.11c वयं गीर्भिर्विपन्यवः ॥

8.022.12a ताभिरा यातं वृषणोप मे हवं विश्वप्सुं विश्ववार्यम् ।

8.022.12c इषा मंहिष्ठा पुरुभूतमा नरा याभिः क्रिविं वावृधुस्ताभिरा गतम् ॥

8.022.13a ताविदा चिदहानां तावश्विना वन्दमान उप ब्रुवे ।

8.022.13c ता उ नमोभिरीमहे ॥

8.022.14a ताविद्दोषा ता उषसि शुभस्पती ता यामन्रुद्रवर्तनी ।

8.022.14c मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति ख्यतम् ॥

8.022.15a आ सुग्म्याय सुग्म्यं प्राता रथेनाश्विना वा सक्षणी ।

8.022.15c हुवे पितेव सोभरी ॥

8.022.16a मनोजवसा वृषणा मदच्युता मक्षुंगमाभिरूतिभिः ।

8.022.16c आरात्ताच्चिद्भूतमस्मे अवसे पूर्वीभिः पुरुभोजसा ॥

8.022.17a आ नो अश्वावदश्विना वर्तिर्यासिष्टं मधुपातमा नरा ।

8.022.17c गोमद्दस्रा हिरण्यवत् ॥

8.022.18a सुप्रावर्गं सुवीर्यं सुष्ठु वार्यमनाधृष्टं रक्षस्विना ।

8.022.18c अस्मिन्ना वामायाने वाजिनीवसू विश्वा वामानि धीमहि ॥

8.023.01a ईळिष्वा हि प्रतीव्यं१ यजस्व जातवेदसम् ।

8.023.01c चरिष्णुधूममगृभीतशोचिषम् ॥

8.023.02a दामानं विश्वचर्षणेऽग्निं विश्वमनो गिरा ।

8.023.02c उत स्तुषे विष्पर्धसो रथानाम् ॥

8.023.03a येषामाबाध ऋग्मिय इषः पृक्षश्च निग्रभे ।

8.023.03c उपविदा वह्निर्विन्दते वसु ॥

8.023.04a उदस्य शोचिरस्थाद्दीदियुषो व्यजरम् ।

8.023.04c तपुर्जम्भस्य सुद्युतो गणश्रियः ॥

8.023.05a उदु तिष्ठ स्वध्वर स्तवानो देव्या कृपा ।

8.023.05c अभिख्या भासा बृहता शुशुक्वनिः ॥

8.023.06a अग्ने याहि सुशस्तिभिर्हव्या जुह्वान आनुषक् ।

8.023.06c यथा दूतो बभूथ हव्यवाहनः ॥

8.023.07a अग्निं वः पूर्व्यं हुवे होतारं चर्षणीनाम् ।

8.023.07c तमया वाचा गृणे तमु व स्तुषे ॥

8.023.08a यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत् ।

8.023.08c मित्रं न जने सुधितमृतावनि ॥

8.023.09a ऋतावानमृतायवो यज्ञस्य साधनं गिरा ।

8.023.09c उपो एनं जुजुषुर्नमसस्पदे ॥

8.023.10a अच्छा नो अङ्गिरस्तमं यज्ञासो यन्तु संयतः ।

8.023.10c होता यो अस्ति विक्ष्वा यशस्तमः ॥

8.023.11a अग्ने तव त्ये अजरेन्धानासो बृहद्भाः ।

8.023.11c अश्वा इव वृषणस्तविषीयवः ॥

8.023.12a स त्वं न ऊर्जां पते रयिं रास्व सुवीर्यम् ।

8.023.12c प्राव नस्तोके तनये समत्स्वा ॥

8.023.13a यद्वा उ विश्पतिः शितः सुप्रीतो मनुषो विशि ।

8.023.13c विश्वेदग्निः प्रति रक्षांसि सेधति ॥

8.023.14a श्रुष्ट्यग्ने नवस्य मे स्तोमस्य वीर विश्पते ।

8.023.14c नि मायिनस्तपुषा रक्षसो दह ॥

8.023.15a न तस्य मायया चन रिपुरीशीत मर्त्यः ।

8.023.15c यो अग्नये ददाश हव्यदातिभिः ॥

8.023.16a व्यश्वस्त्वा वसुविदमुक्षण्युरप्रीणादृषिः ।

8.023.16c महो राये तमु त्वा समिधीमहि ॥

8.023.17a उशना काव्यस्त्वा नि होतारमसादयत् ।

8.023.17c आयजिं त्वा मनवे जातवेदसम् ॥

8.023.18a विश्वे हि त्वा सजोषसो देवासो दूतमक्रत ।

8.023.18c श्रुष्टी देव प्रथमो यज्ञियो भुवः ॥

8.023.19a इमं घा वीरो अमृतं दूतं कृण्वीत मर्त्यः ।

8.023.19c पावकं कृष्णवर्तनिं विहायसम् ॥

8.023.20a तं हुवेम यतस्रुचः सुभासं शुक्रशोचिषम् ।

8.023.20c विशामग्निमजरं प्रत्नमीड्यम् ॥

8.023.21a यो अस्मै हव्यदातिभिराहुतिं मर्तोऽविधत् ।

8.023.21c भूरि पोषं स धत्ते वीरवद्यशः ॥

8.023.22a प्रथमं जातवेदसमग्निं यज्ञेषु पूर्व्यम् ।

8.023.22c प्रति स्रुगेति नमसा हविष्मती ॥

8.023.23a आभिर्विधेमाग्नये ज्येष्ठाभिर्व्यश्ववत् ।

8.023.23c मंहिष्ठाभिर्मतिभिः शुक्रशोचिषे ॥

8.023.24a नूनमर्च विहायसे स्तोमेभि स्थूरयूपवत् ।

8.023.24c ऋषे वैयश्व दम्यायाग्नये ॥

8.023.25a अतिथिं मानुषाणां सूनुं वनस्पतीनाम् ।

8.023.25c विप्रा अग्निमवसे प्रत्नमीळते ॥

8.023.26a महो विश्वाँ अभि षतो३ऽभि हव्यानि मानुषा ।

8.023.26c अग्ने नि षत्सि नमसाधि बर्हिषि ॥

8.023.27a वंस्वा नो वार्या पुरु वंस्व रायः पुरुस्पृहः ।

8.023.27c सुवीर्यस्य प्रजावतो यशस्वतः ॥

8.023.28a त्वं वरो सुषाम्णोऽग्ने जनाय चोदय ।

8.023.28c सदा वसो रातिं यविष्ठ शश्वते ॥

8.023.29a त्वं हि सुप्रतूरसि त्वं नो गोमतीरिषः ।

8.023.29c महो रायः सातिमग्ने अपा वृधि ॥

8.023.30a अग्ने त्वं यशा अस्या मित्रावरुणा वह ।

8.023.30c ऋतावाना सम्राजा पूतदक्षसा ॥

8.024.01a सखाय आ शिषामहि ब्रह्मेन्द्राय वज्रिणे ।

8.024.01c स्तुष ऊ षु वो नृतमाय धृष्णवे ॥

8.024.02a शवसा ह्यसि श्रुतो वृत्रहत्येन वृत्रहा ।

8.024.02c मघैर्मघोनो अति शूर दाशसि ॥

8.024.03a स न स्तवान आ भर रयिं चित्रश्रवस्तमम् ।

8.024.03c निरेके चिद्यो हरिवो वसुर्ददिः ॥

8.024.04a आ निरेकमुत प्रियमिन्द्र दर्षि जनानाम् ।

8.024.04c धृषता धृष्णो स्तवमान आ भर ॥

8.024.05a न ते सव्यं न दक्षिणं हस्तं वरन्त आमुरः ।

8.024.05c न परिबाधो हरिवो गविष्टिषु ॥

8.024.06a आ त्वा गोभिरिव व्रजं गीर्भिरृणोम्यद्रिवः ।

8.024.06c आ स्मा कामं जरितुरा मनः पृण ॥

8.024.07a विश्वानि विश्वमनसो धिया नो वृत्रहन्तम ।

8.024.07c उग्र प्रणेतरधि षू वसो गहि ॥

8.024.08a वयं ते अस्य वृत्रहन्विद्याम शूर नव्यसः ।

8.024.08c वसो स्पार्हस्य पुरुहूत राधसः ॥

8.024.09a इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः ।

8.024.09c अमृक्ता रातिः पुरुहूत दाशुषे ॥

8.024.10a आ वृषस्व महामह महे नृतम राधसे ।

8.024.10c दृळ्हश्चिद्दृह्य मघवन्मघत्तये ॥

8.024.11a नू अन्यत्रा चिदद्रिवस्त्वन्नो जग्मुराशसः ।

8.024.11c मघवञ्छग्धि तव तन्न ऊतिभिः ॥

8.024.12a नह्यङ्ग नृतो त्वदन्यं विन्दामि राधसे ।

8.024.12c राये द्युम्नाय शवसे च गिर्वणः ॥

8.024.13a एन्दुमिन्द्राय सिञ्चत पिबाति सोम्यं मधु ।

8.024.13c प्र राधसा चोदयाते महित्वना ॥

8.024.14a उपो हरीणां पतिं दक्षं पृञ्चन्तमब्रवम् ।

8.024.14c नूनं श्रुधि स्तुवतो अश्व्यस्य ॥

8.024.15a नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वत् ।

8.024.15c नकी राया नैवथा न भन्दना ॥

8.024.16a एदु मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः ।

8.024.16c एवा हि वीर स्तवते सदावृधः ॥

8.024.17a इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम् ।

8.024.17c उदानंश शवसा न भन्दना ॥

8.024.18a तं वो वाजानां पतिमहूमहि श्रवस्यवः ।

8.024.18c अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥

8.024.19a एतो न्विन्द्रं स्तवाम सखाय स्तोम्यं नरम् ।

8.024.19c कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥

8.024.20a अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।

8.024.20c घृतात्स्वादीयो मधुनश्च वोचत ॥

8.024.21a यस्यामितानि वीर्या३ न राधः पर्येतवे ।

8.024.21c ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥

8.024.22a स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् ।

8.024.22c अर्यो गयं मंहमानं वि दाशुषे ॥

8.024.23a एवा नूनमुप स्तुहि वैयश्व दशमं नवम् ।

8.024.23c सुविद्वांसं चर्कृत्यं चरणीनाम् ॥

8.024.24a वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।

8.024.24c अहरहः शुन्ध्युः परिपदामिव ॥

8.024.25a तदिन्द्राव आ भर येना दंसिष्ठ कृत्वने ।

8.024.25c द्विता कुत्साय शिश्नथो नि चोदय ॥

8.024.26a तमु त्वा नूनमीमहे नव्यं दंसिष्ठ सन्यसे ।

8.024.26c स त्वं नो विश्वा अभिमातीः सक्षणिः ॥

8.024.27a य ऋक्षादंहसो मुचद्यो वार्यात्सप्त सिन्धुषु ।

8.024.27c वधर्दासस्य तुविनृम्ण नीनमः ॥

8.024.28a यथा वरो सुषाम्णे सनिभ्य आवहो रयिम् ।

8.024.28c व्यश्वेभ्यः सुभगे वाजिनीवति ॥

8.024.29a आ नार्यस्य दक्षिणा व्यश्वाँ एतु सोमिनः ।

8.024.29c स्थूरं च राधः शतवत्सहस्रवत् ॥

8.024.30a यत्त्वा पृच्छादीजानः कुहया कुहयाकृते ।

8.024.30c एषो अपश्रितो वलो गोमतीमव तिष्ठति ॥

8.025.01a ता वां विश्वस्य गोपा देवा देवेषु यज्ञिया ।

8.025.01c ऋतावाना यजसे पूतदक्षसा ॥

8.025.02a मित्रा तना न रथ्या३ वरुणो यश्च सुक्रतुः ।

8.025.02c सनात्सुजाता तनया धृतव्रता ॥

8.025.03a ता माता विश्ववेदसासुर्याय प्रमहसा ।

8.025.03c मही जजानादितिर्ऋतावरी ॥

8.025.04a महान्ता मित्रावरुणा सम्राजा देवावसुरा ।

8.025.04c ऋतावानावृतमा घोषतो बृहत् ॥

8.025.05a नपाता शवसो महः सूनू दक्षस्य सुक्रतू ।

8.025.05c सृप्रदानू इषो वास्त्वधि क्षितः ॥

8.025.06a सं या दानूनि येमथुर्दिव्याः पार्थिवीरिषः ।

8.025.06c नभस्वतीरा वां चरन्तु वृष्टयः ॥

8.025.07a अधि या बृहतो दिवो३ऽभि यूथेव पश्यतः ।

8.025.07c ऋतावाना सम्राजा नमसे हिता ॥

8.025.08a ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू ।

8.025.08c धृतव्रता क्षत्रिया क्षत्रमाशतुः ॥

8.025.09a अक्ष्णश्चिद्गातुवित्तरानुल्बणेन चक्षसा ।

8.025.09c नि चिन्मिषन्ता निचिरा नि चिक्यतुः ॥

8.025.10a उत नो देव्यदितिरुरुष्यतां नासत्या ।

8.025.10c उरुष्यन्तु मरुतो वृद्धशवसः ॥

8.025.11a ते नो नावमुरुष्यत दिवा नक्तं सुदानवः ।

8.025.11c अरिष्यन्तो नि पायुभिः सचेमहि ॥

8.025.12a अघ्नते विष्णवे वयमरिष्यन्तः सुदानवे ।

8.025.12c श्रुधि स्वयावन्सिन्धो पूर्वचित्तये ॥

8.025.13a तद्वार्यं वृणीमहे वरिष्ठं गोपयत्यम् ।

8.025.13c मित्रो यत्पान्ति वरुणो यदर्यमा ॥

8.025.14a उत नः सिन्धुरपां तन्मरुतस्तदश्विना ।

8.025.14c इन्द्रो विष्णुर्मीढ्वांसः सजोषसः ॥

8.025.15a ते हि ष्मा वनुषो नरोऽभिमातिं कयस्य चित् ।

8.025.15c तिग्मं न क्षोदः प्रतिघ्नन्ति भूर्णयः ॥

8.025.16a अयमेक इत्था पुरूरु चष्टे वि विश्पतिः ।

8.025.16c तस्य व्रतान्यनु वश्चरामसि ॥

8.025.17a अनु पूर्वाण्योक्या साम्राज्यस्य सश्चिम ।

8.025.17c मित्रस्य व्रता वरुणस्य दीर्घश्रुत् ॥

8.025.18a परि यो रश्मिना दिवोऽन्तान्ममे पृथिव्याः ।

8.025.18c उभे आ पप्रौ रोदसी महित्वा ॥

8.025.19a उदु ष्य शरणे दिवो ज्योतिरयंस्त सूर्यः ।

8.025.19c अग्निर्न शुक्रः समिधान आहुतः ॥

8.025.20a वचो दीर्घप्रसद्मनीशे वाजस्य गोमतः ।

8.025.20c ईशे हि पित्वोऽविषस्य दावने ॥

8.025.21a तत्सूर्यं रोदसी उभे दोषा वस्तोरुप ब्रुवे ।

8.025.21c भोजेष्वस्माँ अभ्युच्चरा सदा ॥

8.025.22a ऋज्रमुक्षण्यायने रजतं हरयाणे ।

8.025.22c रथं युक्तमसनाम सुषामणि ॥

8.025.23a ता मे अश्व्यानां हरीणां नितोशना ।

8.025.23c उतो नु कृत्व्यानां नृवाहसा ॥

8.025.24a स्मदभीशू कशावन्ता विप्रा नविष्ठया मती ।

8.025.24c महो वाजिनावर्वन्ता सचासनम् ॥

8.026.01a युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु ।

8.026.01c अतूर्तदक्षा वृषणा वृषण्वसू ॥

8.026.02a युवं वरो सुषाम्णे महे तने नासत्या ।

8.026.02c अवोभिर्याथो वृषणा वृषण्वसू ॥

8.026.03a ता वामद्य हवामहे हव्येभिर्वाजिनीवसू ।

8.026.03c पूर्वीरिष इषयन्तावति क्षपः ॥

8.026.04a आ वां वाहिष्ठो अश्विना रथो यातु श्रुतो नरा ।

8.026.04c उप स्तोमान्तुरस्य दर्शथः श्रिये ॥

8.026.05a जुहुराणा चिदश्विना मन्येथां वृषण्वसू ।

8.026.05c युवं हि रुद्रा पर्षथो अति द्विषः ॥

8.026.06a दस्रा हि विश्वमानुषङ्मक्षूभिः परिदीयथः ।

8.026.06c धियंजिन्वा मधुवर्णा शुभस्पती ॥

8.026.07a उप नो यातमश्विना राया विश्वपुषा सह ।

8.026.07c मघवाना सुवीरावनपच्युता ॥

8.026.08a आ मे अस्य प्रतीव्यमिन्द्रनासत्या गतम् ।

8.026.08c देवा देवेभिरद्य सचनस्तमा ॥

8.026.09a वयं हि वां हवामह उक्षण्यन्तो व्यश्ववत् ।

8.026.09c सुमतिभिरुप विप्राविहा गतम् ॥

8.026.10a अश्विना स्वृषे स्तुहि कुवित्ते श्रवतो हवम् ।

8.026.10c नेदीयसः कूळयातः पणीँरुत ॥

8.026.11a वैयश्वस्य श्रुतं नरोतो मे अस्य वेदथः ।

8.026.11c सजोषसा वरुणो मित्रो अर्यमा ॥

8.026.12a युवादत्तस्य धिष्ण्या युवानीतस्य सूरिभिः ।

8.026.12c अहरहर्वृषण मह्यं शिक्षतम् ॥

8.026.13a यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव ।

8.026.13c सपर्यन्ता शुभे चक्राते अश्विना ॥

8.026.14a यो वामुरुव्यचस्तमं चिकेतति नृपाय्यम् ।

8.026.14c वर्तिरश्विना परि यातमस्मयू ॥

8.026.15a अस्मभ्यं सु वृषण्वसू यातं वर्तिर्नृपाय्यम् ।

8.026.15c विषुद्रुहेव यज्ञमूहथुर्गिरा ॥

8.026.16a वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा ।

8.026.16c युवाभ्यां भूत्वश्विना ॥

8.026.17a यददो दिवो अर्णव इषो वा मदथो गृहे ।

8.026.17c श्रुतमिन्मे अमर्त्या ॥

8.026.18a उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम् ।

8.026.18c सिन्धुर्हिरण्यवर्तनिः ॥

8.026.19a स्मदेतया सुकीर्त्याश्विना श्वेतया धिया ।

8.026.19c वहेथे शुभ्रयावाना ॥

8.026.20a युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।

8.026.20c आन्नो वायो मधु पिबास्माकं सवना गहि ॥

8.026.21a तव वायवृतस्पते त्वष्टुर्जामातरद्भुत ।

8.026.21c अवांस्या वृणीमहे ॥

8.026.22a त्वष्टुर्जामातरं वयमीशानं राय ईमहे ।

8.026.22c सुतावन्तो वायुं द्युम्ना जनासः ॥

8.026.23a वायो याहि शिवा दिवो वहस्वा सु स्वश्व्यम् ।

8.026.23c वहस्व महः पृथुपक्षसा रथे ॥

8.026.24a त्वां हि सुप्सरस्तमं नृषदनेषु हूमहे ।

8.026.24c ग्रावाणं नाश्वपृष्ठं मंहना ॥

8.026.25a स त्वं नो देव मनसा वायो मन्दानो अग्रियः ।

8.026.25c कृधि वाजाँ अपो धियः ॥

8.027.01a अग्निरुक्थे पुरोहितो ग्रावाणो बर्हिरध्वरे ।

8.027.01c ऋचा यामि मरुतो ब्रह्मणस्पतिं देवाँ अवो वरेण्यम् ॥

8.027.02a आ पशुं गासि पृथिवीं वनस्पतीनुषासा नक्तमोषधीः ।

8.027.02c विश्वे च नो वसवो विश्ववेदसो धीनां भूत प्रावितारः ॥

8.027.03a प्र सू न एत्वध्वरो३ऽग्ना देवेषु पूर्व्यः ।

8.027.03c आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु ॥

8.027.04a विश्वे हि ष्मा मनवे विश्ववेदसो भुवन्वृधे रिशादसः ।

8.027.04c अरिष्टेभिः पायुभिर्विश्ववेदसो यन्ता नोऽवृकं छर्दिः ॥

8.027.05a आ नो अद्य समनसो गन्ता विश्वे सजोषसः ।

8.027.05c ऋचा गिरा मरुतो देव्यदिते सदने पस्त्ये महि ॥

8.027.06a अभि प्रिया मरुतो या वो अश्व्या हव्या मित्र प्रयाथन ।

8.027.06c आ बर्हिरिन्द्रो वरुणस्तुरा नर आदित्यासः सदन्तु नः ॥

8.027.07a वयं वो वृक्तबर्हिषो हितप्रयस आनुषक् ।

8.027.07c सुतसोमासो वरुण हवामहे मनुष्वदिद्धाग्नयः ॥

8.027.08a आ प्र यात मरुतो विष्णो अश्विना पूषन्माकीनया धिया ।

8.027.08c इन्द्र आ यातु प्रथमः सनिष्युभिर्वृषा यो वृत्रहा गृणे ॥

8.027.09a वि नो देवासो अद्रुहोऽच्छिद्रं शर्म यच्छत ।

8.027.09c न यद्दूराद्वसवो नू चिदन्तितो वरूथमादधर्षति ॥

8.027.10a अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् ।

8.027.10c प्र णः पूर्वस्मै सुविताय वोचत मक्षू सुम्नाय नव्यसे ॥

8.027.11a इदा हि व उपस्तुतिमिदा वामस्य भक्तये ।

8.027.11c उप वो विश्ववेदसो नमस्युराँ असृक्ष्यन्यामिव ॥

8.027.12a उदु ष्य वः सविता सुप्रणीतयोऽस्थादूर्ध्वो वरेण्यः ।

8.027.12c नि द्विपादश्चतुष्पादो अर्थिनोऽविश्रन्पतयिष्णवः ॥

8.027.13a देवंदेवं वोऽवसे देवंदेवमभिष्टये ।

8.027.13c देवंदेवं हुवेम वाजसातये गृणन्तो देव्या धिया ॥

8.027.14a देवासो हि ष्मा मनवे समन्यवो विश्वे साकं सरातयः ।

8.027.14c ते नो अद्य ते अपरं तुचे तु नो भवन्तु वरिवोविदः ॥

8.027.15a प्र वः शंसाम्यद्रुहः संस्थ उपस्तुतीनाम् ।

8.027.15c न तं धूर्तिर्वरुण मित्र मर्त्यं यो वो धामभ्योऽविधत् ॥

8.027.16a प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ।

8.027.16c प्र प्रजाभिर्जायते धर्मणस्पर्यरिष्टः सर्व एधते ॥

8.027.17a ऋते स विन्दते युधः सुगेभिर्यात्यध्वनः ।

8.027.17c अर्यमा मित्रो वरुणः सरातयो यं त्रायन्ते सजोषसः ॥

8.027.18a अज्रे चिदस्मै कृणुथा न्यञ्चनं दुर्गे चिदा सुसरणम् ।

8.027.18c एषा चिदस्मादशनिः परो नु सास्रेधन्ती वि नश्यतु ॥

8.027.19a यदद्य सूर्य उद्यति प्रियक्षत्रा ऋतं दध ।

8.027.19c यन्निम्रुचि प्रबुधि विश्ववेदसो यद्वा मध्यंदिने दिवः ॥

8.027.20a यद्वाभिपित्वे असुरा ऋतं यते छर्दिर्येम वि दाशुषे ।

8.027.20c वयं तद्वो वसवो विश्ववेदस उप स्थेयाम मध्य आ ॥

8.027.21a यदद्य सूर उदिते यन्मध्यंदिन आतुचि ।

8.027.21c वामं धत्थ मनवे विश्ववेदसो जुह्वानाय प्रचेतसे ॥

8.027.22a वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।

8.027.22c अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै ॥

8.028.01a ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् ।

8.028.01c विदन्नह द्वितासनन् ॥

8.028.02a वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः ।

8.028.02c पत्नीवन्तो वषट्कृताः ॥

8.028.03a ते नो गोपा अपाच्यास्त उदक्त इत्था न्यक् ।

8.028.03c पुरस्तात्सर्वया विशा ॥

8.028.04a यथा वशन्ति देवास्तथेदसत्तदेषां नकिरा मिनत् ।

8.028.04c अरावा चन मर्त्यः ॥

8.028.05a सप्तानां सप्त ऋष्टयः सप्त द्युम्नान्येषाम् ।

8.028.05c सप्तो अधि श्रियो धिरे ॥

8.029.01a बभ्रुरेको विषुणः सूनरो युवाञ्ज्यङ्क्ते हिरण्ययम् ॥

8.029.02a योनिमेक आ ससाद द्योतनोऽन्तर्देवेषु मेधिरः ॥

8.029.03a वाशीमेको बिभर्ति हस्त आयसीमन्तर्देवेषु निध्रुविः ॥

8.029.04a वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते ॥

8.029.05a तिग्ममेको बिभर्ति हस्त आयुधं शुचिरुग्रो जलाषभेषजः ॥

8.029.06a पथ एकः पीपाय तस्करो यथाँ एष वेद निधीनाम् ॥

8.029.07a त्रीण्येक उरुगायो वि चक्रमे यत्र देवासो मदन्ति ॥

8.029.08a विभिर्द्वा चरत एकया सह प्र प्रवासेव वसतः ॥

8.029.09a सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती ॥

8.029.10a अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥

8.030.01a नहि वो अस्त्यर्भको देवासो न कुमारकः ।

8.030.01c विश्वे सतोमहान्त इत् ॥

8.030.02a इति स्तुतासो असथा रिशादसो ये स्थ त्रयश्च त्रिंशच्च ।

8.030.02c मनोर्देवा यज्ञियासः ॥

8.030.03a ते नस्त्राध्वं तेऽवत त उ नो अधि वोचत ।

8.030.03c मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः ॥

8.030.04a ये देवास इह स्थन विश्वे वैश्वानरा उत ।

8.030.04c अस्मभ्यं शर्म सप्रथो गवेऽश्वाय यच्छत ॥

8.031.01a यो यजाति यजात इत्सुनवच्च पचाति च ।

8.031.01c ब्रह्मेदिन्द्रस्य चाकनत् ॥

8.031.02a पुरोळाशं यो अस्मै सोमं ररत आशिरम् ।

8.031.02c पादित्तं शक्रो अंहसः ॥

8.031.03a तस्य द्युमाँ असद्रथो देवजूतः स शूशुवत् ।

8.031.03c विश्वा वन्वन्नमित्रिया ॥

8.031.04a अस्य प्रजावती गृहेऽसश्चन्ती दिवेदिवे ।

8.031.04c इळा धेनुमती दुहे ॥

8.031.05a या दम्पती समनसा सुनुत आ च धावतः ।

8.031.05c देवासो नित्ययाशिरा ॥

8.031.06a प्रति प्राशव्याँ इतः सम्यञ्चा बर्हिराशाते ।

8.031.06c न ता वाजेषु वायतः ॥

8.031.07a न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः ।

8.031.07c श्रवो बृहद्विवासतः ॥

8.031.08a पुत्रिणा ता कुमारिणा विश्वमायुर्व्यश्नुतः ।

8.031.08c उभा हिरण्यपेशसा ॥

8.031.09a वीतिहोत्रा कृतद्वसू दशस्यन्तामृताय कम् ।

8.031.09c समूधो रोमशं हतो देवेषु कृणुतो दुवः ॥

8.031.10a आ शर्म पर्वतानां वृणीमहे नदीनाम् ।

8.031.10c आ विष्णोः सचाभुवः ॥

8.031.11a ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः ।

8.031.11c उरुरध्वा स्वस्तये ॥

8.031.12a अरमतिरनर्वणो विश्वो देवस्य मनसा ।

8.031.12c आदित्यानामनेह इत् ॥

8.031.13a यथा नो मित्रो अर्यमा वरुणः सन्ति गोपाः ।

8.031.13c सुगा ऋतस्य पन्थाः ॥

8.031.14a अग्निं वः पूर्व्यं गिरा देवमीळे वसूनाम् ।

8.031.14c सपर्यन्तः पुरुप्रियं मित्रं न क्षेत्रसाधसम् ॥

8.031.15a मक्षू देववतो रथः शूरो वा पृत्सु कासु चित् ।

8.031.15c देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥

8.031.16a न यजमान रिष्यसि न सुन्वान न देवयो ।

8.031.16c देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥

8.031.17a नकिष्टं कर्मणा नशन्न प्र योषन्न योषति ।

8.031.17c देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥

8.031.18a असदत्र सुवीर्यमुत त्यदाश्वश्व्यम् ।

8.031.18c देवानां य इन्मनो यजमान इयक्षत्यभीदयज्वनो भुवत् ॥

8.032.01a प्र कृतान्यृजीषिणः कण्वा इन्द्रस्य गाथया ।

8.032.01c मदे सोमस्य वोचत ॥

8.032.02a यः सृबिन्दमनर्शनिं पिप्रुं दासमहीशुवम् ।

8.032.02c वधीदुग्रो रिणन्नपः ॥

8.032.03a न्यर्बुदस्य विष्टपं वर्ष्माणं बृहतस्तिर ।

8.032.03c कृषे तदिन्द्र पौंस्यम् ॥

8.032.04a प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि ।

8.032.04c हुवे सुशिप्रमूतये ॥

8.032.05a स गोरश्वस्य वि व्रजं मन्दानः सोम्येभ्यः ।

8.032.05c पुरं न शूर दर्षसि ॥

8.032.06a यदि मे रारणः सुत उक्थे वा दधसे चनः ।

8.032.06c आरादुप स्वधा गहि ॥

8.032.07a वयं घा ते अपि ष्मसि स्तोतार इन्द्र गिर्वणः ।

8.032.07c त्वं नो जिन्व सोमपाः ॥

8.032.08a उत नः पितुमा भर संरराणो अविक्षितम् ।

8.032.08c मघवन्भूरि ते वसु ॥

8.032.09a उत नो गोमतस्कृधि हिरण्यवतो अश्विनः ।

8.032.09c इळाभिः सं रभेमहि ॥

8.032.10a बृबदुक्थं हवामहे सृप्रकरस्नमूतये ।

8.032.10c साधु कृण्वन्तमवसे ॥

8.032.11a यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा ।

8.032.11c जरितृभ्यः पुरूवसुः ॥

8.032.12a स नः शक्रश्चिदा शकद्दानवाँ अन्तराभरः ।

8.032.12c इन्द्रो विश्वाभिरूतिभिः ॥

8.032.13a यो रायो३ऽवनिर्महान्सुपारः सुन्वतः सखा ।

8.032.13c तमिन्द्रमभि गायत ॥

8.032.14a आयन्तारं महि स्थिरं पृतनासु श्रवोजितम् ।

8.032.14c भूरेरीशानमोजसा ॥

8.032.15a नकिरस्य शचीनां नियन्ता सूनृतानाम् ।

8.032.15c नकिर्वक्ता न दादिति ॥

8.032.16a न नूनं ब्रह्मणामृणं प्राशूनामस्ति सुन्वताम् ।

8.032.16c न सोमो अप्रता पपे ॥

8.032.17a पन्य इदुप गायत पन्य उक्थानि शंसत ।

8.032.17c ब्रह्मा कृणोत पन्य इत् ॥

8.032.18a पन्य आ दर्दिरच्छता सहस्रा वाज्यवृतः ।

8.032.18c इन्द्रो यो यज्वनो वृधः ॥

8.032.19a वि षू चर स्वधा अनु कृष्टीनामन्वाहुवः ।

8.032.19c इन्द्र पिब सुतानाम् ॥

8.032.20a पिब स्वधैनवानामुत यस्तुग्र्ये सचा ।

8.032.20c उतायमिन्द्र यस्तव ॥

8.032.21a अतीहि मन्युषाविणं सुषुवांसमुपारणे ।

8.032.21c इमं रातं सुतं पिब ॥

8.032.22a इहि तिस्रः परावत इहि पञ्च जनाँ अति ।

8.032.22c धेना इन्द्रावचाकशत् ॥

8.032.23a सूर्यो रश्मिं यथा सृजा त्वा यच्छन्तु मे गिरः।

8.032.23c निम्नमापो न सध्र्यक्॥

8.032.24a अध्वर्यवा तु हि षिञ्च सोमं वीराय शिप्रिणे।

8.032.24c भरा सुतस्य पीतये॥

8.032.25a य उद्नः फलिगं भिनन्न्यक्सिन्धूँरवासृजत्।

8.032.25c यो गोषु पक्वं धारयत्॥

8.032.26a अहन्वृत्रमृचीषम और्णवाभमहीशुवम्।

8.032.26c हिमेनाविध्यदर्बुदम्॥

8.032.27a प्र व उग्राय निष्टुरेऽषाळ्हाय प्रसक्षिणे।

8.032.27c देवत्तं ब्रह्म गायत॥

8.032.28a यो विश्वान्यभि व्रता सोमस्य मदे अन्धसः।

8.032.28c इन्द्रो देवेषु चेतति॥

8.032.29a इह त्या सधमाद्या हरी हिरण्यकेश्या।

8.032.29c वोळ्हामभि प्रयो हितम्॥

8.032.30a अर्वाञ्चं त्वा पुरुष्टुत प्रियमेधस्तुता हरी।

8.032.30c सोमपेयाय वक्षतः॥

8.033.01a वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः।

8.033.01c पवित्रस्य प्रस्रवणेषु वृत्रहन्परि स्तोतार आसते ॥

8.033.02a स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।

8.033.02c कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥

8.033.03a कण्वेभिर्धृष्णवा धृषद्वाजं दर्षि सहस्रिणम् ।

8.033.03c पिशङ्गरूपं मघवन्विचर्षणे मक्षू गोमन्तमीमहे ॥

8.033.04a पाहि गायान्धसो मद इन्द्राय मेध्यातिथे ।

8.033.04c यः सम्मिश्लो हर्योर्यः सुते सचा वज्री रथो हिरण्ययः ॥

8.033.05a यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे ।

8.033.05c य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः ॥

8.033.06a यो धृषितो योऽवृतो यो अस्ति श्मश्रुषु श्रितः ।

8.033.06c विभूतद्युम्नश्च्यवनः पुरुष्टुतः क्रत्वा गौरिव शाकिनः ॥

8.033.07a क ईं वेद सुते सचा पिबन्तं कद्वयो दधे ।

8.033.07c अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥

8.033.08a दाना मृगो न वारणः पुरुत्रा चरथं दधे ।

8.033.08c नकिष्ट्वा नि यमदा सुते गमो महाँश्चरस्योजसा ॥

8.033.09a य उग्रः सन्ननिष्टृत स्थिरो रणाय संस्कृतः ।

8.033.09c यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥

8.033.10a सत्यमित्था वृषेदसि वृषजूतिर्नोऽवृतः ।

8.033.10c वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावति श्रुतः ॥

8.033.11a वृषणस्ते अभीशवो वृषा कशा हिरण्ययी ।

8.033.11c वृषा रथो मघवन्वृषणा हरी वृषा त्वं शतक्रतो ॥

8.033.12a वृषा सोता सुनोतु ते वृषन्नृजीपिन्ना भर ।

8.033.12c वृषा दधन्वे वृषणं नदीष्वा तुभ्यं स्थातर्हरीणाम् ॥

8.033.13a एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् ।

8.033.13c नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च सुक्रतुः ॥

8.033.14a वहन्तु त्वा रथेष्ठामा हरयो रथयुजः ।

8.033.14c तिरश्चिदर्यं सवनानि वृत्रहन्नन्येषां या शतक्रतो ॥

8.033.15a अस्माकमद्यान्तमं स्तोमं धिष्व महामह ।

8.033.15c अस्माकं ते सवना सन्तु शंतमा मदाय द्युक्ष सोमपाः ॥

8.033.16a नहि षस्तव नो मम शास्त्रे अन्यस्य रण्यति ।

8.033.16c यो अस्मान्वीर आनयत् ॥

8.033.17a इन्द्रश्चिद्घा तदब्रवीत्स्त्रिया अशास्यं मनः ।

8.033.17c उतो अह क्रतुं रघुम् ॥

8.033.18a सप्ती चिद्घा मदच्युता मिथुना वहतो रथम् ।

8.033.18c एवेद्धूर्वृष्ण उत्तरा ॥

8.033.19a अधः पश्यस्व मोपरि संतरां पादकौ हर ।

8.033.19c मा ते कशप्लकौ दृशन्स्त्री हि ब्रह्मा बभूविथ ॥

8.034.01a एन्द्र याहि हरिभिरुप कण्वस्य सुष्टुतिम् ।

8.034.01c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.02a आ त्वा ग्रावा वदन्निह सोमी घोषेण यच्छतु ।

8.034.02c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.03a अत्रा वि नेमिरेषामुरां न धूनुते वृकः ।

8.034.03c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.04a आ त्वा कण्वा इहावसे हवन्ते वाजसातये ।

8.034.04c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.05a दधामि ते सुतानां वृष्णे न पूर्वपाय्यम् ।

8.034.05c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.06a स्मत्पुरंधिर्न आ गहि विश्वतोधीर्न ऊतये ।

8.034.06c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.07a आ नो याहि महेमते सहस्रोते शतामघ ।

8.034.07c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.08a आ त्वा होता मनुर्हितो देवत्रा वक्षदीड्यः ।

8.034.08c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.09a आ त्वा मदच्युता हरी श्येनं पक्षेव वक्षतः ।

8.034.09c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.10a आ याह्यर्य आ परि स्वाहा सोमस्य पीतये ।

8.034.10c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.11a आ नो याह्युपश्रुत्युक्थेषु रणया इह ।

8.034.11c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.12a सरूपैरा सु नो गहि सम्भृतैः सम्भृताश्वः ।

8.034.12c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.13a आ याहि पर्वतेभ्यः समुद्रस्याधि विष्टपः ।

8.034.13c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.14a आ नो गव्यान्यश्व्या सहस्रा शूर दर्दृहि ।

8.034.14c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.15a आ नः सहस्रशो भरायुतानि शतानि च ।

8.034.15c दिवो अमुष्य शासतो दिवं यय दिवावसो ॥

8.034.16a आ यदिन्द्रश्च दद्वहे सहस्रं वसुरोचिषः ।

8.034.16c ओजिष्ठमश्व्यं पशुम् ॥

8.034.17a य ऋज्रा वातरंहसोऽरुषासो रघुष्यदः ।

8.034.17c भ्राजन्ते सूर्या इव ॥

8.034.18a पारावतस्य रातिषु द्रवच्चक्रेष्वाशुषु ।

8.034.18c तिष्ठं वनस्य मध्य आ ॥

8.035.01a अग्निनेन्द्रेण वरुणेन विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा ।

8.035.01c सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥

8.035.02a विश्वाभिर्धीभिर्भुवनेन वाजिना दिवा पृथिव्याद्रिभिः सचाभुवा ।

8.035.02c सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥

8.035.03a विश्वैर्देवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा ।

8.035.03c सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥

8.035.04a जुषेथां यज्ञं बोधतं हवस्य मे विश्वेह देवौ सवनाव गच्छतम् ।

8.035.04c सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥

8.035.05a स्तोमं जुषेथां युवशेव कन्यनां विश्वेह देवौ सवनाव गच्छतम् ।

8.035.05c सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥

8.035.06a गिरो जुषेथामध्वरं जुषेथां विश्वेह देवौ सवनाव गच्छतम् ।

8.035.06c सजोषसा उषसा सूर्येण चेषं नो वोळ्हमश्विना ॥

8.035.07a हारिद्रवेव पतथो वनेदुप सोमं सुतं महिषेवाव गच्छथः ।

8.035.07c सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥

8.035.08a हंसाविव पतथो अध्वगाविव सोमं सुतं महिषेवाव गच्छथः ।

8.035.08c सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥

8.035.09a श्येनाविव पतथो हव्यदातये सोमं सुतं महिषेवाव गच्छथः ।

8.035.09c सजोषसा उषसा सूर्येण च त्रिर्वर्तिर्यातमश्विना ॥

8.035.10a पिबतं च तृप्णुतं चा च गच्छतं प्रजां च धत्तं द्रविणं च धत्तम् ।

8.035.10c सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥

8.035.11a जयतं च प्र स्तुतं च प्र चावतं प्रजां च धत्तं द्रविणं च धत्तम् ।

8.035.11c सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥

8.035.12a हतं च शत्रून्यततं च मित्रिणः प्रजां च धत्तं द्रविणं च धत्तम् ।

8.035.12c सजोषसा उषसा सूर्येण चोर्जं नो धत्तमश्विना ॥

8.035.13a मित्रावरुणवन्ता उत धर्मवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।

8.035.13c सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥

8.035.14a अङ्गिरस्वन्ता उत विष्णुवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।

8.035.14c सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥

8.035.15a ऋभुमन्ता वृषणा वाजवन्ता मरुत्वन्ता जरितुर्गच्छथो हवम् ।

8.035.15c सजोषसा उषसा सूर्येण चादित्यैर्यातमश्विना ॥

8.035.16a ब्रह्म जिन्वतमुत जिन्वतं धियो हतं रक्षांसि सेधतममीवाः ।

8.035.16c सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥

8.035.17a क्षत्रं जिन्वतमुत जिन्वतं नॄन्हतं रक्षांसि सेधतममीवाः ।

8.035.17c सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥

8.035.18a धेनूर्जिन्वतमुत जिन्वतं विशो हतं रक्षांसि सेधतममीवाः ।

8.035.18c सजोषसा उषसा सूर्येण च सोमं सुन्वतो अश्विना ॥

8.035.19a अत्रेरिव शृणुतं पूर्व्यस्तुतिं श्यावाश्वस्य सुन्वतो मदच्युता ।

8.035.19c सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥

8.035.20a सर्गाँ इव सृजतं सुष्टुतीरुप श्यावाश्वस्य सुन्वतो मदच्युता ।

8.035.20c सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥

8.035.21a रश्मीँरिव यच्छतमध्वराँ उप श्यावाश्वस्य सुन्वतो मदच्युता ।

8.035.21c सजोषसा उषसा सूर्येण चाश्विना तिरोअह्न्यम् ॥

8.035.22a अर्वाग्रथं नि यच्छतं पिबतं सोम्यं मधु ।

8.035.22c आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥

8.035.23a नमोवाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये ।

8.035.23c आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥

8.035.24a स्वाहाकृतस्य तृम्पतं सुतस्य देवावन्धसः ।

8.035.24c आ यातमश्विना गतमवस्युर्वामहं हुवे धत्तं रत्नानि दाशुषे ॥

8.036.01a अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो ।

8.036.01c यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥

8.036.02a प्राव स्तोतारं मघवन्नव त्वां पिबा सोमं मदाय कं शतक्रतो ।

8.036.02c यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥

8.036.03a ऊर्जा देवाँ अवस्योजसा त्वां पिबा सोमं मदाय कं शतक्रतो ।

8.036.03c यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥

8.036.04a जनिता दिवो जनिता पृथिव्याः पिबा सोमं मदाय कं शतक्रतो ।

8.036.04c यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥

8.036.05a जनिताश्वानां जनिता गवामसि पिबा सोमं मदाय कं शतक्रतो ।

8.036.05c यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥

8.036.06a अत्रीणां स्तोममद्रिवो महस्कृधि पिबा सोमं मदाय कं शतक्रतो ।

8.036.06c यं ते भागमधारयन्विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते ॥

8.036.07a श्यावाश्वस्य सुन्वतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।

8.036.07c प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र ब्रह्माणि वर्धयन् ॥

8.037.01a प्रेदं ब्रह्म वृत्रतूर्येष्वाविथ प्र सुन्वतः शचीपत इन्द्र विश्वाभिरूतिभिः ।

8.037.01d माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥

8.037.02a सेहान उग्र पृतना अभि द्रुहः शचीपत इन्द्र विश्वाभिरूतिभिः ।

8.037.02d माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥

8.037.03a एकराळस्य भुवनस्य राजसि शचीपत इन्द्र विश्वाभिरूतिभिः ।

8.037.03d माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥

8.037.04a सस्थावाना यवयसि त्वमेक इच्छचीपत इन्द्र विश्वाभिरूतिभिः ।

8.037.04d माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥

8.037.05a क्षेमस्य च प्रयुजश्च त्वमीशिषे शचीपत इन्द्र विश्वाभिरूतिभिः ।

8.037.05d माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥

8.037.06a क्षत्राय त्वमवसि न त्वमाविथ शचीपत इन्द्र विश्वाभिरूतिभिः ।

8.037.06d माध्यंदिनस्य सवनस्य वृत्रहन्ननेद्य पिबा सोमस्य वज्रिवः ॥

8.037.07a श्यावाश्वस्य रेभतस्तथा शृणु यथाशृणोरत्रेः कर्माणि कृण्वतः ।

8.037.07c प्र त्रसदस्युमाविथ त्वमेक इन्नृषाह्य इन्द्र क्षत्राणि वर्धयन् ॥

8.038.01a यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु ।

8.038.01c इन्द्राग्नी तस्य बोधतम् ॥

8.038.02a तोशासा रथयावाना वृत्रहणापराजिता ।

8.038.02c इन्द्राग्नी तस्य बोधतम् ॥

8.038.03a इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः ।

8.038.03c इन्द्राग्नी तस्य बोधतम् ॥

8.038.04a जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती ।

8.038.04c इन्द्राग्नी आ गतं नरा ॥

8.038.05a इमा जुषेथां सवना येभिर्हव्यान्यूहथुः ।

8.038.05c इन्द्राग्नी आ गतं नरा ॥

8.038.06a इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम ।

8.038.06c इन्द्राग्नी आ गतं नरा ॥

8.038.07a प्रातर्यावभिरा गतं देवेभिर्जेन्यावसू ।

8.038.07c इन्द्राग्नी सोमपीतये ॥

8.038.08a श्यावाश्वस्य सुन्वतोऽत्रीणां शृणुतं हवम् ।

8.038.08c इन्द्राग्नी सोमपीतये ॥

8.038.09a एवा वामह्व ऊतये यथाहुवन्त मेधिराः ।

8.038.09c इन्द्राग्नी सोमपीतये ॥

8.038.10a आहं सरस्वतीवतोरिन्द्राग्न्योरवो वृणे ।

8.038.10c याभ्यां गायत्रमृच्यते ॥

8.039.01a अग्निमस्तोष्यृग्मियमग्निमीळा यजध्यै ।

8.039.01c अग्निर्देवाँ अनक्तु न उभे हि विदथे कविरन्तश्चरति दूत्यं१ नभन्तामन्यके समे ॥

8.039.02a न्यग्ने नव्यसा वचस्तनूषु शंसमेषाम् ।

8.039.02c न्यराती रराव्णां विश्वा अर्यो अरातीरितो युच्छन्त्वामुरो नभन्तामन्यके समे ॥

8.039.03a अग्ने मन्मानि तुभ्यं कं घृतं न जुह्व आसनि ।

8.039.03c स देवेषु प्र चिकिद्धि त्वं ह्यसि पूर्व्यः शिवो दूतो विवस्वतो नभन्तामन्यके समे ॥

8.039.04a तत्तदग्निर्वयो दधे यथायथा कृपण्यति ।

8.039.04c ऊर्जाहुतिर्वसूनां शं च योश्च मयो दधे विश्वस्यै देवहूत्यै नभन्तामन्यके समे ॥

8.039.05a स चिकेत सहीयसाग्निश्चित्रेण कर्मणा ।

8.039.05c स होता शश्वतीनां दक्षिणाभिरभीवृत इनोति च प्रतीव्यं१ नभन्तामन्यके समे ॥

8.039.06a अग्निर्जाता देवानामग्निर्वेद मर्तानामपीच्यम् ।

8.039.06c अग्निः स द्रविणोदा अग्निर्द्वारा व्यूर्णुते स्वाहुतो नवीयसा नभन्तामन्यके समे ॥

8.039.07a अग्निर्देवेषु संवसुः स विक्षु यज्ञियास्वा ।

8.039.07c स मुदा काव्या पुरु विश्वं भूमेव पुष्यति देवो देवेषु यज्ञियो नभन्तामन्यके समे ॥

8.039.08a यो अग्निः सप्तमानुषः श्रितो विश्वेषु सिन्धुषु ।

8.039.08c तमागन्म त्रिपस्त्यं मन्धातुर्दस्युहन्तममग्निं यज्ञेषु पूर्व्यं नभन्तामन्यके समे ॥

8.039.09a अग्निस्त्रीणि त्रिधातून्या क्षेति विदथा कविः ।

8.039.09c स त्रीँरेकादशाँ इह यक्षच्च पिप्रयच्च नो विप्रो दूतः परिष्कृतो नभन्तामन्यके समे ॥

8.039.10a त्वं नो अग्न आयुषु त्वं देवेषु पूर्व्य वस्व एक इरज्यसि ।

8.039.10d त्वामापः परिस्रुतः परि यन्ति स्वसेतवो नभन्तामन्यके समे ॥

8.040.01a इन्द्राग्नी युवं सु नः सहन्ता दासथो रयिम् ।

8.040.01c येन दृळ्हा समत्स्वा वीळु चित्साहिषीमह्यग्निर्वनेव वात इन्नभन्तामन्यके समे ॥

8.040.02a नहि वां वव्रयामहेऽथेन्द्रमिद्यजामहे शविष्ठं नृणां नरम् ।

8.040.02d स नः कदा चिदर्वता गमदा वाजसातये गमदा मेधसातये नभन्तामन्यके समे ॥

8.040.03a ता हि मध्यं भराणामिन्द्राग्नी अधिक्षितः ।

8.040.03c ता उ कवित्वना कवी पृच्छ्यमाना सखीयते सं धीतमश्नुतं नरा नभन्तामन्यके समे ॥

8.040.04a अभ्यर्च नभाकवदिन्द्राग्नी यजसा गिरा ।

8.040.04c ययोर्विश्वमिदं जगदियं द्यौः पृथिवी मह्युपस्थे बिभृतो वसु नभन्तामन्यके समे ॥

8.040.05a प्र ब्रह्माणि नभाकवदिन्द्राग्निभ्यामिरज्यत ।

8.040.05c या सप्तबुध्नमर्णवं जिह्मबारमपोर्णुत इन्द्र ईशान ओजसा नभन्तामन्यके समे ॥

8.040.06a अपि वृश्च पुराणवद्व्रततेरिव गुष्पितमोजो दासस्य दम्भय ।

8.040.06d वयं तदस्य सम्भृतं वस्विन्द्रेण वि भजेमहि नभन्तामन्यके समे ॥

8.040.07a यदिन्द्राग्नी जना इमे विह्वयन्ते तना गिरा ।

8.040.07c अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे ॥

8.040.08a या नु श्वेताववो दिव उच्चरात उप द्युभिः ।

8.040.08c इन्द्राग्न्योरनु व्रतमुहाना यन्ति सिन्धवो यान्सीं बन्धादमुञ्चतां नभन्तामन्यके समे ॥

8.040.09a पूर्वीष्ट इन्द्रोपमातयः पूर्वीरुत प्रशस्तयः सूनो हिन्वस्य हरिवः ।

8.040.09d वस्वो वीरस्यापृचो या नु साधन्त नो धियो नभन्तामन्यके समे ॥

8.040.10a तं शिशीता सुवृक्तिभिस्त्वेषं सत्वानमृग्मियम् ।

8.040.10c उतो नु चिद्य ओजसा शुष्णस्याण्डानि भेदति जेषत्स्वर्वतीरपो नभन्तामन्यके समे ॥

8.040.11a तं शिशीता स्वध्वरं सत्यं सत्वानमृत्वियम् ।

8.040.11c उतो नु चिद्य ओहत आण्डा शुष्णस्य भेदत्यजैः स्वर्वतीरपो नभन्तामन्यके समे ॥

8.040.12a एवेन्द्राग्निभ्यां पितृवन्नवीयो मन्धातृवदङ्गिरस्वदवाचि ।

8.040.12c त्रिधातुना शर्मणा पातमस्मान्वयं स्याम पतयो रयीणाम् ॥

8.041.01a अस्मा ऊ षु प्रभूतये वरुणाय मरुद्भ्योऽर्चा विदुष्टरेभ्यः ।

8.041.01d यो धीता मानुषाणां पश्वो गा इव रक्षति नभन्तामन्यके समे ॥

8.041.02a तमू षु समना गिरा पितॄणां च मन्मभिः ।

8.041.02c नाभाकस्य प्रशस्तिभिर्यः सिन्धूनामुपोदये सप्तस्वसा स मध्यमो नभन्तामन्यके समे ॥

8.041.03a स क्षपः परि षस्वजे न्युस्रो मायया दधे स विश्वं परि दर्शतः ।

8.041.03d तस्य वेनीरनु व्रतमुषस्तिस्रो अवर्धयन्नभन्तामन्यके समे ॥

8.041.04a यः ककुभो निधारयः पृथिव्यामधि दर्शतः ।

8.041.04c स माता पूर्व्यं पदं तद्वरुणस्य सप्त्यं स हि गोपा इवेर्यो नभन्तामन्यके समे ॥

8.041.05a यो धर्ता भुवनानां य उस्राणामपीच्या३ वेद नामानि गुह्या ।

8.041.05d स कविः काव्या पुरु रूपं द्यौरिव पुष्यति नभन्तामन्यके समे ॥

8.041.06a यस्मिन्विश्वानि काव्या चक्रे नाभिरिव श्रिता ।

8.041.06c त्रितं जूती सपर्यत व्रजे गावो न संयुजे युजे अश्वाँ अयुक्षत नभन्तामन्यके समे ॥

8.041.07a य आस्वत्क आशये विश्वा जातान्येषाम् ।

8.041.07c परि धामानि मर्मृशद्वरुणस्य पुरो गये विश्वे देवा अनु व्रतं नभन्तामन्यके समे ॥

8.041.08a स समुद्रो अपीच्यस्तुरो द्यामिव रोहति नि यदासु यजुर्दधे ।

8.041.08d स माया अर्चिना पदास्तृणान्नाकमारुहन्नभन्तामन्यके समे ॥

8.041.09a यस्य श्वेता विचक्षणा तिस्रो भूमीरधिक्षितः ।

8.041.09c त्रिरुत्तराणि पप्रतुर्वरुणस्य ध्रुवं सदः स सप्तानामिरज्यति नभन्तामन्यके समे ॥

8.041.10a यः श्वेताँ अधिनिर्णिजश्चक्रे कृष्णाँ अनु व्रता ।

8.041.10c स धाम पूर्व्यं ममे य स्कम्भेन वि रोदसी अजो न द्यामधारयन्नभन्तामन्यके समे ॥

8.042.01a अस्तभ्नाद्द्यामसुरो विश्ववेदा अमिमीत वरिमाणं पृथिव्याः ।

8.042.01c आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि ॥

8.042.02a एवा वन्दस्व वरुणं बृहन्तं नमस्या धीरममृतस्य गोपाम् ।

8.042.02c स नः शर्म त्रिवरूथं वि यंसत्पातं नो द्यावापृथिवी उपस्थे ॥

8.042.03a इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।

8.042.03c ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ॥

8.042.04a आ वां ग्रावाणो अश्विना धीभिर्विप्रा अचुच्यवुः ।

8.042.04c नासत्या सोमपीतये नभन्तामन्यके समे ॥

8.042.05a यथा वामत्रिरश्विना गीर्भिर्विप्रो अजोहवीत् ।

8.042.05c नासत्या सोमपीतये नभन्तामन्यके समे ॥

8.042.06a एवा वामह्व ऊतये यथाहुवन्त मेधिराः ।

8.042.06c नासत्या सोमपीतये नभन्तामन्यके समे ॥

8.043.01a इमे विप्रस्य वेधसोऽग्नेरस्तृतयज्वनः ।

8.043.01c गिर स्तोमास ईरते ॥

8.043.02a अस्मै ते प्रतिहर्यते जातवेदो विचर्षणे ।

8.043.02c अग्ने जनामि सुष्टुतिम् ॥

8.043.03a आरोका इव घेदह तिग्मा अग्ने तव त्विषः ।

8.043.03c दद्भिर्वनानि बप्सति ॥

8.043.04a हरयो धूमकेतवो वातजूता उप द्यवि ।

8.043.04c यतन्ते वृथगग्नयः ॥

8.043.05a एते त्ये वृथगग्नय इद्धासः समदृक्षत ।

8.043.05c उषसामिव केतवः ॥

8.043.06a कृष्णा रजांसि पत्सुतः प्रयाणे जातवेदसः ।

8.043.06c अग्निर्यद्रोधति क्षमि ॥

8.043.07a धासिं कृण्वान ओषधीर्बप्सदग्निर्न वायति ।

8.043.07c पुनर्यन्तरुणीरपि ॥

8.043.08a जिह्वाभिरह नन्नमदर्चिषा जञ्जणाभवन् ।

8.043.08c अग्निर्वनेषु रोचते ॥

8.043.09a अप्स्वग्ने सधिष्टव सौषधीरनु रुध्यसे ।

8.043.09c गर्भे सञ्जायसे पुनः ॥

8.043.10a उदग्ने तव तद्धृतादर्ची रोचत आहुतम् ।

8.043.10c निंसानं जुह्वो३ मुखे ॥

8.043.11a उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।

8.043.11c स्तोमैर्विधेमाग्नये ॥

8.043.12a उत त्वा नमसा वयं होतर्वरेण्यक्रतो ।

8.043.12c अग्ने समिद्भिरीमहे ॥

8.043.13a उत त्वा भृगुवच्छुचे मनुष्वदग्न आहुत ।

8.043.13c अङ्गिरस्वद्धवामहे ॥

8.043.14a त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्सता ।

8.043.14c सखा सख्या समिध्यसे ॥

8.043.15a स त्वं विप्राय दाशुषे रयिं देहि सहस्रिणम् ।

8.043.15c अग्ने वीरवतीमिषम् ॥

8.043.16a अग्ने भ्रातः सहस्कृत रोहिदश्व शुचिव्रत ।

8.043.16c इमं स्तोमं जुषस्व मे ॥

8.043.17a उत त्वाग्ने मम स्तुतो वाश्राय प्रतिहर्यते ।

8.043.17c गोष्ठं गाव इवाशत ॥

8.043.18a तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक् ।

8.043.18c अग्ने कामाय येमिरे ॥

8.043.19a अग्निं धीभिर्मनीषिणो मेधिरासो विपश्चितः ।

8.043.19c अद्मसद्याय हिन्विरे ॥

8.043.20a तं त्वामज्मेषु वाजिनं तन्वाना अग्ने अध्वरम् ।

8.043.20c वह्निं होतारमीळते ॥

8.043.21a पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः ।

8.043.21c समत्सु त्वा हवामहे ॥

8.043.22a तमीळिष्व य आहुतोऽग्निर्विभ्राजते घृतैः ।

8.043.22c इमं नः शृणवद्धवम् ॥

8.043.23a तं त्वा वयं हवामहे शृण्वन्तं जातवेदसम् ।

8.043.23c अग्ने घ्नन्तमप द्विषः ॥

8.043.24a विशां राजानमद्भुतमध्यक्षं धर्मणामिमम् ।

8.043.24c अग्निमीळे स उ श्रवत् ॥

8.043.25a अग्निं विश्वायुवेपसं मर्यं न वाजिनं हितम् ।

8.043.25c सप्तिं न वाजयामसि ॥

8.043.26a घ्नन्मृध्राण्यप द्विषो दहन्रक्षांसि विश्वहा ।

8.043.26c अग्ने तिग्मेन दीदिहि ॥

8.043.27a यं त्वा जनास इन्धते मनुष्वदङ्गिरस्तम ।

8.043.27c अग्ने स बोधि मे वचः ॥

8.043.28a यदग्ने दिविजा अस्यप्सुजा वा सहस्कृत ।

8.043.28c तं त्वा गीर्भिर्हवामहे ॥

8.043.29a तुभ्यं घेत्ते जना इमे विश्वाः सुक्षितयः पृथक् ।

8.043.29c धासिं हिन्वन्त्यत्तवे ॥

8.043.30a ते घेदग्ने स्वाध्योऽहा विश्वा नृचक्षसः ।

8.043.30c तरन्तः स्याम दुर्गहा ॥

8.043.31a अग्निं मन्द्रं पुरुप्रियं शीरं पावकशोचिषम् ।

8.043.31c हृद्भिर्मन्द्रेभिरीमहे ॥

8.043.32a स त्वमग्ने विभावसुः सृजन्सूर्यो न रश्मिभिः ।

8.043.32c शर्धन्तमांसि जिघ्नसे ॥

8.043.33a तत्ते सहस्व ईमहे दात्रं यन्नोपदस्यति ।

8.043.33c त्वदग्ने वार्यं वसु ॥

8.044.01a समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।

8.044.01c आस्मिन्हव्या जुहोतन ॥

8.044.02a अग्ने स्तोमं जुषस्व मे वर्धस्वानेन मन्मना ।

8.044.02c प्रति सूक्तानि हर्य नः ॥

8.044.03a अग्निं दूतं पुरो दधे हव्यवाहमुप ब्रुवे ।

8.044.03c देवाँ आ सादयादिह ॥

8.044.04a उत्ते बृहन्तो अर्चयः समिधानस्य दीदिवः ।

8.044.04c अग्ने शुक्रास ईरते ॥

8.044.05a उप त्वा जुह्वो३ मम घृताचीर्यन्तु हर्यत ।

8.044.05c अग्ने हव्या जुषस्व नः ॥

8.044.06a मन्द्रं होतारमृत्विजं चित्रभानुं विभावसुम् ।

8.044.06c अग्निमीळे स उ श्रवत् ॥

8.044.07a प्रत्नं होतारमीड्यं जुष्टमग्निं कविक्रतुम् ।

8.044.07c अध्वराणामभिश्रियम् ॥

8.044.08a जुषाणो अङ्गिरस्तमेमा हव्यान्यानुषक् ।

8.044.08c अग्ने यज्ञं नय ऋतुथा ॥

8.044.09a समिधान उ सन्त्य शुक्रशोच इहा वह ।

8.044.09c चिकित्वान्दैव्यं जनम् ॥

8.044.10a विप्रं होतारमद्रुहं धूमकेतुं विभावसुम् ।

8.044.10c यज्ञानां केतुमीमहे ॥

8.044.11a अग्ने नि पाहि नस्त्वं प्रति ष्म देव रीषतः ।

8.044.11c भिन्धि द्वेषः सहस्कृत ॥

8.044.12a अग्निः प्रत्नेन मन्मना शुम्भानस्तन्वं१ स्वाम् ।

8.044.12c कविर्विप्रेण वावृधे ॥

8.044.13a ऊर्जो नपातमा हुवेऽग्निं पावकशोचिषम् ।

8.044.13c अस्मिन्यज्ञे स्वध्वरे ॥

8.044.14a स नो मित्रमहस्त्वमग्ने शुक्रेण शोचिषा ।

8.044.14c देवैरा सत्सि बर्हिषि ॥

8.044.15a यो अग्निं तन्वो३ दमे देवं मर्तः सपर्यति ।

8.044.15c तस्मा इद्दीदयद्वसु ॥

8.044.16a अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ।

8.044.16c अपां रेतांसि जिन्वति ॥

8.044.17a उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते ।

8.044.17c तव ज्योतींष्यर्चयः ॥

8.044.18a ईशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः ।

8.044.18c स्तोता स्यां तव शर्मणि ॥

8.044.19a त्वामग्ने मनीषिणस्त्वां हिन्वन्ति चित्तिभिः ।

8.044.19c त्वां वर्धन्तु नो गिरः ॥

8.044.20a अदब्धस्य स्वधावतो दूतस्य रेभतः सदा ।

8.044.20c अग्नेः सख्यं वृणीमहे ॥

8.044.21a अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः ।

8.044.21c शुची रोचत आहुतः ॥

8.044.22a उत त्वा धीतयो मम गिरो वर्धन्तु विश्वहा ।

8.044.22c अग्ने सख्यस्य बोधि नः ॥

8.044.23a यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम् ।

8.044.23c स्युष्टे सत्या इहाशिषः ॥

8.044.24a वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः ।

8.044.24c स्याम ते सुमतावपि ॥

8.044.25a अग्ने धृतव्रताय ते समुद्रायेव सिन्धवः ।

8.044.25c गिरो वाश्रास ईरते ॥

8.044.26a युवानं विश्पतिं कविं विश्वादं पुरुवेपसम् ।

8.044.26c अग्निं शुम्भामि मन्मभिः ॥

8.044.27a यज्ञानां रथ्ये वयं तिग्मजम्भाय वीळवे ।

8.044.27c स्तोमैरिषेमाग्नये ॥

8.044.28a अयमग्ने त्वे अपि जरिता भूतु सन्त्य ।

8.044.28c तस्मै पावक मृळय ॥

8.044.29a धीरो ह्यस्यद्मसद्विप्रो न जागृविः सदा ।

8.044.29c अग्ने दीदयसि द्यवि ॥

8.044.30a पुराग्ने दुरितेभ्यः पुरा मृध्रेभ्यः कवे ।

8.044.30c प्र ण आयुर्वसो तिर ॥

8.045.01a आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् ।

8.045.01c येषामिन्द्रो युवा सखा ॥

8.045.02a बृहन्निदिध्म एषां भूरि शस्तं पृथुः स्वरुः ।

8.045.02c येषामिन्द्रो युवा सखा ॥

8.045.03a अयुद्ध इद्युधा वृतं शूर आजति सत्वभिः ।

8.045.03c येषामिन्द्रो युवा सखा ॥

8.045.04a आ बुन्दं वृत्रहा ददे जातः पृच्छद्वि मातरम् ।

8.045.04c क उग्राः के ह शृण्विरे ॥

8.045.05a प्रति त्वा शवसी वदद्गिरावप्सो न योधिषत् ।

8.045.05c यस्ते शत्रुत्वमाचके ॥

8.045.06a उत त्वं मघवञ्छृणु यस्ते वष्टि ववक्षि तत् ।

8.045.06c यद्वीळयासि वीळु तत् ॥

8.045.07a यदाजिं यात्याजिकृदिन्द्रः स्वश्वयुरुप ।

8.045.07c रथीतमो रथीनाम् ॥

8.045.08a वि षु विश्वा अभियुजो वज्रिन्विष्वग्यथा वृह ।

8.045.08c भवा नः सुश्रवस्तमः ॥

8.045.09a अस्माकं सु रथं पुर इन्द्रः कृणोतु सातये ।

8.045.09c न यं धूर्वन्ति धूर्तयः ॥

8.045.10a वृज्याम ते परि द्विषोऽरं ते शक्र दावने ।

8.045.10c गमेमेदिन्द्र गोमतः ॥

8.045.11a शनैश्चिद्यन्तो अद्रिवोऽश्वावन्तः शतग्विनः ।

8.045.11c विवक्षणा अनेहसः ॥

8.045.12a ऊर्ध्वा हि ते दिवेदिवे सहस्रा सूनृता शता ।

8.045.12c जरितृभ्यो विमंहते ॥

8.045.13a विद्मा हि त्वा धनंजयमिन्द्र दृळ्हा चिदारुजम् ।

8.045.13c आदारिणं यथा गयम् ॥

8.045.14a ककुहं चित्त्वा कवे मन्दन्तु धृष्णविन्दवः ।

8.045.14c आ त्वा पणिं यदीमहे ॥

8.045.15a यस्ते रेवाँ अदाशुरिः प्रममर्ष मघत्तये ।

8.045.15c तस्य नो वेद आ भर ॥

8.045.16a इम उ त्वा वि चक्षते सखाय इन्द्र सोमिनः ।

8.045.16c पुष्टावन्तो यथा पशुम् ॥

8.045.17a उत त्वाबधिरं वयं श्रुत्कर्णं सन्तमूतये ।

8.045.17c दूरादिह हवामहे ॥

8.045.18a यच्छुश्रूया इमं हवं दुर्मर्षं चक्रिया उत ।

8.045.18c भवेरापिर्नो अन्तमः ॥

8.045.19a यच्चिद्धि ते अपि व्यथिर्जगन्वांसो अमन्महि ।

8.045.19c गोदा इदिन्द्र बोधि नः ॥

8.045.20a आ त्वा रम्भं न जिव्रयो ररभ्मा शवसस्पते ।

8.045.20c उश्मसि त्वा सधस्थ आ ॥

8.045.21a स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने ।

8.045.21c नकिर्यं वृण्वते युधि ॥

8.045.22a अभि त्वा वृषभा सुते सुतं सृजामि पीतये ।

8.045.22c तृम्पा व्यश्नुही मदम् ॥

8.045.23a मा त्वा मूरा अविष्यवो मोपहस्वान आ दभन् ।

8.045.23c माकीं ब्रह्मद्विषो वनः ॥

8.045.24a इह त्वा गोपरीणसा महे मन्दन्तु राधसे ।

8.045.24c सरो गौरो यथा पिब ॥

8.045.25a या वृत्रहा परावति सना नवा च चुच्युवे ।

8.045.25c ता संसत्सु प्र वोचत ॥

8.045.26a अपिबत्कद्रुवः सुतमिन्द्रः सहस्रबाह्वे ।

8.045.26c अत्रादेदिष्ट पौंस्यम् ॥

8.045.27a सत्यं तत्तुर्वशे यदौ विदानो अह्नवाय्यम् ।

8.045.27c व्यानट् तुर्वणे शमि ॥

8.045.28a तरणिं वो जनानां त्रदं वाजस्य गोमतः ।

8.045.28c समानमु प्र शंसिषम् ॥

8.045.29a ऋभुक्षणं न वर्तव उक्थेषु तुग्र्यावृधम् ।

8.045.29c इन्द्रं सोमे सचा सुते ॥

8.045.30a यः कृन्तदिद्वि योन्यं त्रिशोकाय गिरिं पृथुम् ।

8.045.30c गोभ्यो गातुं निरेतवे ॥

8.045.31a यद्दधिषे मनस्यसि मन्दानः प्रेदियक्षसि ।

8.045.31c मा तत्करिन्द्र मृळय ॥

8.045.32a दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि ।

8.045.32c जिगात्विन्द्र ते मनः ॥

8.045.33a तवेदु ताः सुकीर्तयोऽसन्नुत प्रशस्तयः ।

8.045.33c यदिन्द्र मृळयासि नः ॥

8.045.34a मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु ।

8.045.34c वधीर्मा शूर भूरिषु ॥

8.045.35a बिभया हि त्वावत उग्रादभिप्रभङ्गिणः ।

8.045.35c दस्मादहमृतीषहः ॥

8.045.36a मा सख्युः शूनमा विदे मा पुत्रस्य प्रभूवसो ।

8.045.36c आवृत्वद्भूतु ते मनः ॥

8.045.37a को नु मर्या अमिथितः सखा सखायमब्रवीत् ।

8.045.37c जहा को अस्मदीषते ॥

8.045.38a एवारे वृषभा सुतेऽसिन्वन्भूर्यावयः ।

8.045.38c श्वघ्नीव निवता चरन् ॥

8.045.39a आ त एता वचोयुजा हरी गृभ्णे सुमद्रथा ।

8.045.39c यदीं ब्रह्मभ्य इद्ददः ॥

8.045.40a भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।

8.045.40c वसु स्पार्हं तदा भर ॥

8.045.41a यद्वीळाविन्द्र यत्स्थिरे यत्पर्शाने पराभृतम् ।

8.045.41c वसु स्पार्हं तदा भर ॥

8.045.42a यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति ।

8.045.42c वसु स्पार्हं तदा भर ॥

8.046.01a त्वावतः पुरूवसो वयमिन्द्र प्रणेतः ।

8.046.01c स्मसि स्थातर्हरीणाम् ॥

8.046.02a त्वां हि सत्यमद्रिवो विद्म दातारमिषाम् ।

8.046.02c विद्म दातारं रयीणाम् ॥

8.046.03a आ यस्य ते महिमानं शतमूते शतक्रतो ।

8.046.03c गीर्भिर्गृणन्ति कारवः ॥

8.046.04a सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा ।

8.046.04c मित्रः पान्त्यद्रुहः ॥

8.046.05a दधानो गोमदश्ववत्सुवीर्यमादित्यजूत एधते ।

8.046.05c सदा राया पुरुस्पृहा ॥

8.046.06a तमिन्द्रं दानमीमहे शवसानमभीर्वम् ।

8.046.06c ईशानं राय ईमहे ॥

8.046.07a तस्मिन्हि सन्त्यूतयो विश्वा अभीरवः सचा ।

8.046.07c तमा वहन्तु सप्तयः पुरूवसुं मदाय हरयः सुतम् ॥

8.046.08a यस्ते मदो वरेण्यो य इन्द्र वृत्रहन्तमः ।

8.046.08c य आददिः स्वर्नृभिर्यः पृतनासु दुष्टरः ॥

8.046.09a यो दुष्टरो विश्ववार श्रवाय्यो वाजेष्वस्ति तरुता ।

8.046.09c स नः शविष्ठ सवना वसो गहि गमेम गोमति व्रजे ॥

8.046.10a गव्यो षु णो यथा पुराश्वयोत रथया ।

8.046.10c वरिवस्य महामह ॥

8.046.11a नहि ते शूर राधसोऽन्तं विन्दामि सत्रा ।

8.046.11c दशस्या नो मघवन्नू चिदद्रिवो धियो वाजेभिराविथ ॥

8.046.12a य ऋष्वः श्रावयत्सखा विश्वेत्स वेद जनिमा पुरुष्टुतः ।

8.046.12c तं विश्वे मानुषा युगेन्द्रं हवन्ते तविषं यतस्रुचः ॥

8.046.13a स नो वाजेष्वविता पुरूवसुः पुरस्थाता मघवा वृत्रहा भुवत् ॥

8.046.14a अभि वो वीरमन्धसो मदेषु गाय गिरा महा विचेतसम् ।

8.046.14c इन्द्रं नाम श्रुत्यं शाकिनं वचो यथा ॥

8.046.15a ददी रेक्णस्तन्वे ददिर्वसु ददिर्वाजेषु पुरुहूत वाजिनम् ।

8.046.15c नूनमथ ॥

8.046.16a विश्वेषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः ।

8.046.16c कृपयतो नूनमत्यथ ॥

8.046.17a महः सु वो अरमिषे स्तवामहे मीळ्हुषे अरंगमाय जग्मये ।

8.046.17c यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा ॥

8.046.18a ये पातयन्ते अज्मभिर्गिरीणां स्नुभिरेषाम् ।

8.046.18c यज्ञं महिष्वणीनां सुम्नं तुविष्वणीनां प्राध्वरे ॥

8.046.19a प्रभङ्गं दुर्मतीनामिन्द्र शविष्ठा भर ।

8.046.19c रयिमस्मभ्यं युज्यं चोदयन्मते ज्येष्ठं चोदयन्मते ॥

8.046.20a सनितः सुसनितरुग्र चित्र चेतिष्ठ सूनृत ।

8.046.20c प्रासहा सम्राट् सहुरिं सहन्तं भुज्युं वाजेषु पूर्व्यम् ॥

8.046.21a आ स एतु य ईवदाँ अदेवः पूर्तमाददे ।

8.046.21c यथा चिद्वशो अश्व्यः पृथुश्रवसि कानीते३ऽस्या व्युष्याददे ॥

8.046.22a षष्टिं सहस्राश्व्यस्यायुतासनमुष्ट्रानां विंशतिं शता ।

8.046.22c दश श्यावीनां शता दश त्र्यरुषीणां दश गवां सहस्रा ॥

8.046.23a दश श्यावा ऋधद्रयो वीतवारास आशवः ।

8.046.23c मथ्रा नेमिं नि वावृतुः ॥

8.046.24a दानासः पृथुश्रवसः कानीतस्य सुराधसः ।

8.046.24c रथं हिरण्ययं ददन्मंहिष्ठः सूरिरभूद्वर्षिष्ठमकृत श्रवः ॥

8.046.25a आ नो वायो महे तने याहि मखाय पाजसे ।

8.046.25c वयं हि ते चकृमा भूरि दावने सद्यश्चिन्महि दावने ॥

8.046.26a यो अश्वेभिर्वहते वस्त उस्रास्त्रिः सप्त सप्ततीनाम् ।

8.046.26c एभिः सोमेभिः सोमसुद्भिः सोमपा दानाय शुक्रपूतपाः ॥

8.046.27a यो म इमं चिदु त्मनामन्दच्चित्रं दावने ।

8.046.27c अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः ॥

8.046.28a उचथ्ये३ वपुषि यः स्वराळुत वायो घृतस्नाः ।

8.046.28c अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत् ॥

8.046.29a अध प्रियमिषिराय षष्टिं सहस्रासनम् ।

8.046.29c अश्वानामिन्न वृष्णाम् ॥

8.046.30a गावो न यूथमुप यन्ति वध्रय उप मा यन्ति वध्रयः ॥

8.046.31a अध यच्चारथे गणे शतमुष्ट्राँ अचिक्रदत् ।

8.046.31c अध श्वित्नेषु विंशतिं शता ॥

8.046.32a शतं दासे बल्बूथे विप्रस्तरुक्ष आ ददे ।

8.046.32c ते ते वायविमे जना मदन्तीन्द्रगोपा मदन्ति देवगोपाः ॥

8.046.33a अध स्या योषणा मही प्रतीची वशमश्व्यम् ।

8.046.33c अधिरुक्मा वि नीयते ॥

8.047.01a महि वो महतामवो वरुण मित्र दाशुषे ।

8.047.01c यमादित्या अभि द्रुहो रक्षथा नेमघं नशदनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.02a विदा देवा अघानामादित्यासो अपाकृतिम् ।

8.047.02c पक्षा वयो यथोपरि व्यस्मे शर्म यच्छतानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.03a व्यस्मे अधि शर्म तत्पक्षा वयो न यन्तन ।

8.047.03c विश्वानि विश्ववेदसो वरूथ्या मनामहेऽनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.04a यस्मा अरासत क्षयं जीवातुं च प्रचेतसः ।

8.047.04c मनोर्विश्वस्य घेदिम आदित्या राय ईशतेऽनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.05a परि णो वृणजन्नघा दुर्गाणि रथ्यो यथा ।

8.047.05c स्यामेदिन्द्रस्य शर्मण्यादित्यानामुतावस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.06a परिह्वृतेदना जनो युष्मादत्तस्य वायति ।

8.047.06c देवा अदभ्रमाश वो यमादित्या अहेतनानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.07a न तं तिग्मं चन त्यजो न द्रासदभि तं गुरु ।

8.047.07c यस्मा उ शर्म सप्रथ आदित्यासो अराध्वमनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.08a युष्मे देवा अपि ष्मसि युध्यन्त इव वर्मसु ।

8.047.08c यूयं महो न एनसो यूयमर्भादुरुष्यतानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.09a अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु ।

8.047.09c माता मित्रस्य रेवतोऽर्यम्णो वरुणस्य चानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.10a यद्देवाः शर्म शरणं यद्भद्रं यदनातुरम् ।

8.047.10c त्रिधातु यद्वरूथ्यं१ तदस्मासु वि यन्तनानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.11a आदित्या अव हि ख्यताधि कूलादिव स्पशः ।

8.047.11c सुतीर्थमर्वतो यथानु नो नेषथा सुगमनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.12a नेह भद्रं रक्षस्विने नावयै नोपया उत ।

8.047.12c गवे च भद्रं धेनवे वीराय च श्रवस्यतेऽनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.13a यदाविर्यदपीच्यं१ देवासो अस्ति दुष्कृतम् ।

8.047.13c त्रिते तद्विश्वमाप्त्य आरे अस्मद्दधातनानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.14a यच्च गोषु दुष्वप्न्यं यच्चास्मे दुहितर्दिवः ।

8.047.14c त्रिताय तद्विभावर्याप्त्याय परा वहानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.15a निष्कं वा घा कृणवते स्रजं वा दुहितर्दिवः ।

8.047.15c त्रिते दुष्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.16a तदन्नाय तदपसे तं भागमुपसेदुषे ।

8.047.16c त्रिताय च द्विताय चोषो दुष्वप्न्यं वहानेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.17a यथा कलां यथा शफं यथ ऋणं संनयामसि ।

8.047.17c एवा दुष्वप्न्यं सर्वमाप्त्ये सं नयामस्यनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.047.18a अजैष्माद्यासनाम चाभूमानागसो वयम् ।

8.047.18c उषो यस्माद्दुष्वप्न्यादभैष्माप तदुच्छत्वनेहसो व ऊतयः सुतयो व ऊतयः ॥

8.048.01a स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य ।

8.048.01c विश्वे यं देवा उत मर्त्यासो मधु ब्रुवन्तो अभि संचरन्ति ॥

8.048.02a अन्तश्च प्रागा अदितिर्भवास्यवयाता हरसो दैव्यस्य ।

8.048.02c इन्दविन्द्रस्य सख्यं जुषाणः श्रौष्टीव धुरमनु राय ऋध्याः ॥

8.048.03a अपाम सोमममृता अभूमागन्म ज्योतिरविदाम देवान् ।

8.048.03c किं नूनमस्मान्कृणवदरातिः किमु धूर्तिरमृत मर्त्यस्य ॥

8.048.04a शं नो भव हृद आ पीत इन्दो पितेव सोम सूनवे सुशेवः ।

8.048.04c सखेव सख्य उरुशंस धीरः प्र ण आयुर्जीवसे सोम तारीः ॥

8.048.05a इमे मा पीता यशस उरुष्यवो रथं न गावः समनाह पर्वसु ।

8.048.05c ते मा रक्षन्तु विस्रसश्चरित्रादुत मा स्रामाद्यवयन्त्विन्दवः ॥

8.048.06a अग्निं न मा मथितं सं दिदीपः प्र चक्षय कृणुहि वस्यसो नः ।

8.048.06c अथा हि ते मद आ सोम मन्ये रेवाँ इव प्र चरा पुष्टिमच्छ ॥

8.048.07a इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः ।

8.048.07c सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि ॥

8.048.08a सोम राजन्मृळया नः स्वस्ति तव स्मसि व्रत्याꣳस्तस्य विद्धि ।

8.048.08c अलर्ति दक्ष उत मन्युरिन्दो मा नो अर्यो अनुकामं परा दाः ॥

8.048.09a त्वं हि नस्तन्वः सोम गोपा गात्रेगात्रे निषसत्था नृचक्षाः ।

8.048.09c यत्ते वयं प्रमिनाम व्रतानि स नो मृळ सुषखा देव वस्यः ॥

8.048.10a ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः ।

8.048.10c अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः ॥

8.048.11a अप त्या अस्थुरनिरा अमीवा निरत्रसन्तमिषीचीरभैषुः ।

8.048.11c आ सोमो अस्माँ अरुहद्विहाया अगन्म यत्र प्रतिरन्त आयुः ॥

8.048.12a यो न इन्दुः पितरो हृत्सु पीतोऽमर्त्यो मर्त्याँ आविवेश ।

8.048.12c तस्मै सोमाय हविषा विधेम मृळीके अस्य सुमतौ स्याम ॥

8.048.13a त्वं सोम पितृभिः संविदानोऽनु द्यावापृथिवी आ ततन्थ ।

8.048.13c तस्मै त इन्दो हविषा विधेम वयं स्याम पतयो रयीणाम् ॥

8.048.14a त्रातारो देवा अधि वोचता नो मा नो निद्रा ईशत मोत जल्पिः ।

8.048.14c वयं सोमस्य विश्वह प्रियासः सुवीरासो विदथमा वदेम ॥

8.048.15a त्वं नः सोम विश्वतो वयोधास्त्वं स्वर्विदा विशा नृचक्षाः ।

8.048.15c त्वं न इन्द ऊतिभिः सजोषाः पाहि पश्चातादुत वा पुरस्तात् ॥

8.049.01a अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।

8.049.01c यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥

8.049.02a शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।

8.049.02c गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥

8.049.03a आ त्वा सुतास इन्दवो मदा य इन्द्र गिर्वणः ।

8.049.03c आपो न वज्रिन्नन्वोक्यं१ सरः पृणन्ति शूर राधसे ॥

8.049.04a अनेहसं प्रतरणं विवक्षणं मध्वः स्वादिष्ठमीं पिब ।

8.049.04c आ यथा मन्दसानः किरासि नः प्र क्षुद्रेव त्मना धृषत् ॥

8.049.05a आ न स्तोममुप द्रवद्धियानो अश्वो न सोतृभिः ।

8.049.05c यं ते स्वधावन्स्वदयन्ति धेनव इन्द्र कण्वेषु रातयः ॥

8.049.06a उग्रं न वीरं नमसोप सेदिम विभूतिमक्षितावसुम् ।

8.049.06c उद्रीव वज्रिन्नवतो न सिञ्चते क्षरन्तीन्द्र धीतयः ॥

8.049.07a यद्ध नूनं यद्वा यज्ञे यद्वा पृथिव्यामधि ।

8.049.07c अतो नो यज्ञमाशुभिर्महेमत उग्र उग्रेभिरा गहि ॥

8.049.08a अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः ।

8.049.08c येभिरपत्यं मनुषः परीयसे येभिर्विश्वं स्वर्दृशे ॥

8.049.09a एतावतस्त ईमह इन्द्र सुम्नस्य गोमतः ।

8.049.09c यथा प्रावो मघवन्मेध्यातिथिं यथा नीपातिथिं धने ॥

8.049.10a यथा कण्वे मघवन्त्रसदस्यवि यथा पक्थे दशव्रजे ।

8.049.10c यथा गोशर्ये असनोर्ऋजिश्वनीन्द्र गोमद्धिरण्यवत् ॥

8.050.01a प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।

8.050.01c यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥

8.050.02a शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।

8.050.02c गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥

8.050.03a यदीं सुतास इन्दवोऽभि प्रियममन्दिषुः ।

8.050.03c आपो न धायि सवनं म आ वसो दुघा इवोप दाशुषे ॥

8.050.04a अनेहसं वो हवमानमूतये मध्वः क्षरन्ति धीतयः ।

8.050.04c आ त्वा वसो हवमानास इन्दव उप स्तोत्रेषु दधिरे ॥

8.050.05a आ नः सोमे स्वध्वर इयानो अत्यो न तोशते ।

8.050.05c यं ते स्वदावन्स्वदन्ति गूर्तयः पौरे छन्दयसे हवम् ॥

8.050.06a प्र वीरमुग्रं विविचिं धनस्पृतं विभूतिं राधसो महः ।

8.050.06c उद्रीव वज्रिन्नवतो वसुत्वना सदा पीपेथ दाशुषे ॥

8.050.07a यद्ध नूनं परावति यद्वा पृथिव्यां दिवि ।

8.050.07c युजान इन्द्र हरिभिर्महेमत ऋष्व ऋष्वेभिरा गहि ॥

8.050.08a रथिरासो हरयो ये ते अस्रिध ओजो वातस्य पिप्रति ।

8.050.08c येभिर्नि दस्युं मनुषो निघोषयो येभिः स्वः परीयसे ॥

8.050.09a एतावतस्ते वसो विद्याम शूर नव्यसः ।

8.050.09c यथा प्राव एतशं कृत्व्ये धने यथा वशं दशव्रजे ॥

8.050.10a यथा कण्वे मघवन्मेधे अध्वरे दीर्घनीथे दमूनसि ।

8.050.10c यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रं हरिश्रियम् ॥

8.051.01a यथा मनौ सांवरणौ सोममिन्द्रापिबः सुतम् ।

8.051.01c नीपातिथौ मघवन्मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा ॥

8.051.02a पार्षद्वाणः प्रस्कण्वं समसादयच्छयानं जिव्रिमुद्धितम् ।

8.051.02c सहस्राण्यसिषासद्गवामृषिस्त्वोतो दस्यवे वृकः ॥

8.051.03a य उक्थेभिर्न विन्धते चिकिद्य ऋषिचोदनः ।

8.051.03c इन्द्रं तमच्छा वद नव्यस्या मत्यरिष्यन्तं न भोजसे ॥

8.051.04a यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।

8.051.04c स त्वि१मा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम् ॥

8.051.05a यो नो दाता वसूनामिन्द्रं तं हूमहे वयम् ।

8.051.05c विद्मा ह्यस्य सुमतिं नवीयसीं गमेम गोमति व्रजे ॥

8.051.06a यस्मै त्वं वसो दानाय शिक्षसि स रायस्पोषमश्नुते ।

8.051.06c तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥

8.051.07a कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।

8.051.07c उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥

8.051.08a प्र यो ननक्षे अभ्योजसा क्रिविं वधैः शुष्णं निघोषयन् ।

8.051.08c यदेदस्तम्भीत्प्रथयन्नमूं दिवमादिज्जनिष्ट पार्थिवः ॥

8.051.09a यस्यायं विश्व आर्यो दासः शेवधिपा अरिः ।

8.051.09c तिरश्चिदर्ये रुशमे परीरवि तुभ्येत्सो अज्यते रयिः ॥

8.051.10a तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः ।

8.051.10c अस्मे रयिः पप्रथे वृष्ण्यं शवोऽस्मे सुवानास इन्दवः ॥

8.052.01a यथा मनौ विवस्वति सोमं शक्रापिबः सुतम् ।

8.052.01c यथा त्रिते छन्द इन्द्र जुजोषस्यायौ मादयसे सचा ॥

8.052.02a पृषध्रे मेध्ये मातरिश्वनीन्द्र सुवाने अमन्दथाः ।

8.052.02c यथा सोमं दशशिप्रे दशोण्ये स्यूमरश्मावृजूनसि ॥

8.052.03a य उक्था केवला दधे यः सोमं धृषितापिबत् ।

8.052.03c यस्मै विष्णुस्त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः ॥

8.052.04a यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिञ्छतक्रतो ।

8.052.04c तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः ॥

8.052.05a यो नो दाता स नः पिता महाँ उग्र ईशानकृत् ।

8.052.05c अयामन्नुग्रो मघवा पुरूवसुर्गोरश्वस्य प्र दातु नः ॥

8.052.06a यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति ।

8.052.06c वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥

8.052.07a कदा चन प्र युच्छस्युभे नि पासि जन्मनी ।

8.052.07c तुरीयादित्य हवनं त इन्द्रियमा तस्थावमृतं दिवि ॥

8.052.08a यस्मै त्वं मघवन्निन्द्र गिर्वणः शिक्षो शिक्षसि दाशुषे ।

8.052.08c अस्माकं गिर उत सुष्टुतिं वसो कण्ववच्छृणुधी हवम् ॥

8.052.09a अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत ।

8.052.09c पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥

8.052.10a समिन्द्रो रायो बृहतीरधूनुत सं क्षोणी समु सूर्यम् ।

8.052.10c सं शुक्रासः शुचयः सं गवाशिरः सोमा इन्द्रममन्दिषुः ॥

8.053.01a उपमं त्वा मघोनां ज्येष्ठं च वृषभाणाम्।

8.053.01c पूर्भित्तमं मघवन्निन्द्र गोविदमीशानं राय ईमहे ॥

8.053.02a य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ।

8.053.02c तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे ॥

8.053.03a आ नो विश्वेषां रसं मध्वः सिञ्चन्त्वद्रयः ।

8.053.03c ये परावति सुन्विरे जनेष्वा ये अर्वावतीन्दवः ॥

8.053.04a विश्वा द्वेषांसि जहि चाव चा कृधि विश्वे सन्वन्त्वा वसु ।

8.053.04c शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि ॥

8.053.05a इन्द्र नेदीय एदिहि मितमेधाभिरूतिभिः ।

8.053.05c आ शंतम शंतमाभिरभिष्टिभिरा स्वापे स्वापिभिः ॥

8.053.06a आजितुरं सत्पतिं विश्वचर्षणिं कृधि प्रजास्वाभगम्।

8.053.06c प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् ॥

8.053.07a यस्ते साधिष्ठोऽवसे ते स्याम भरेषु ते ।

8.053.07c वयं होत्राभिरुत देवहूतिभिः ससवांसो मनामहे ॥

8.053.08a अहं हि ते हरिवो ब्रह्म वाजयुराजिं यामि सदोतिभिः ।

8.053.08c त्वामिदेव तममे समश्वयुर्गव्युरग्रे मथीनाम्॥

8.054.01a एतत्त इन्द्र वीर्यं गीर्भिर्गृणन्ति कारवः ।

8.054.01c ते स्तोभन्त ऊर्जमावन्घृतश्चुतं पौरासो नक्षन्धीतिभिः ॥

8.054.02a नक्षन्त इन्द्रमवसे सुकृत्यया येषां सुतेषु मन्दसे ।

8.054.02c यथा संवर्ते अमदो यथा कृश एवास्मे इन्द्र मत्स्व ॥

8.054.03a आ नो विश्वे सजोषसो देवासो गन्तनोप नः ।

8.054.03c वसवो रुद्रा अवसे न आ गमञ्छृण्वन्तु मरुतो हवम् ॥

8.054.04a पूषा विष्णुर्हवनं मे सरस्वत्यवन्तु सप्त सिन्धवः ।

8.054.04c आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथिवी हवम् ॥

8.054.05a यदिन्द्र राधो अस्ति ते माघोनं मघवत्तम ।

8.054.05c तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन् ॥

8.054.06a आजिपते नृपते त्वमिद्धि नो वाज आ वक्षि सुक्रतो ।

8.054.06c वीती होत्राभिरुत देववीतिभिः ससवांसो वि शृण्विरे ॥

8.054.07a सन्ति ह्यर्य आशिष इन्द्र आयुर्जनानाम् ।

8.054.07c अस्मान्नक्षस्व मघवन्नुपावसे धुक्षस्व पिप्युषीमिषम् ॥

8.054.08a वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो ।

8.054.08c महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वाय नि तोशय ॥

8.055.01a भूरीदिन्द्रस्य वीर्यं व्यख्यमभ्यायति ।

8.055.01c राधस्ते दस्यवे वृक ॥

8.055.02a शतं श्वेतास उक्षणो दिवि तारो न रोचन्ते ।

8.055.02c मह्ना दिवं न तस्तभुः ॥

8.055.03a शतं वेणूञ्छतं शुनः शतं चर्माणि म्लातानि ।

8.055.03c शतं मे बल्बजस्तुका अरुषीणां चतुःशतम् ॥

8.055.04a सुदेवा स्थ काण्वायना वयोवयो विचरन्तः ।

8.055.04c अश्वासो न चङ्क्रमत ॥

8.055.05a आदित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः ।

8.055.05c श्यावीरतिध्वसन्पथश्चक्षुषा चन संनशे ॥

8.056.01a प्रति ते दस्यवे वृक राधो अदर्श्यह्रयम् ।

8.056.01c द्यौर्न प्रथिना शवः ॥

8.056.02a दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः ।

8.056.02c नित्याद्रायो अमंहत ॥

8.056.03a शतं मे गर्दभानां शतमूर्णावतीनाम् ।

8.056.03c शतं दासाँ अति स्रजः ॥

8.056.04a तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता ।

8.056.04c अश्वानामिन्न यूथ्याम् ॥

8.056.05a अचेत्यग्निश्चिकितुर्हव्यवाट् स सुमद्रथः ।

8.056.05c अग्निः शुक्रेण शोचिषा बृहत्सूरो अरोचत दिवि सूर्यो अरोचत ॥

8.057.01a युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा ।

8.057.01c आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः ॥

8.057.02a युवां देवास्त्रय एकादशासः सत्याः सत्यस्य ददृशे पुरस्तात् ।

8.057.02c अस्माकं यज्ञं सवनं जुषाणा पातं सोममश्विना दीद्यग्नी ॥

8.057.03a पनाय्यं तदश्विना कृतं वां वृषभो दिवो रजसः पृथिव्याः ।

8.057.03c सहस्रं शंसा उत ये गविष्टौ सर्वाँ इत्ताँ उप याता पिबध्यै ॥

8.057.04a अयं वां भागो निहितो यजत्रेमा गिरो नासत्योप यातम् ।

8.057.04c पिबतं सोमं मधुमन्तमस्मे प्र दाश्वांसमवतं शचीभिः ॥

8.058.01a यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति ।

8.058.01c यो अनूचानो ब्राह्मणो युक्त आसीत्का स्वित्तत्र यजमानस्य संवित् ॥

8.058.02a एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।

8.058.02c एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम् ॥

8.058.03a ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।

8.058.03c चित्रामघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै ॥

8.059.01a इमानि वां भागधेयानि सिस्रत इन्द्रावरुणा प्र महे सुतेषु वाम् ।

8.059.01c यज्ञेयज्ञे ह सवना भुरण्यथो यत्सुन्वते यजमानाय शिक्षथः ॥

8.059.02a निष्षिध्वरीरोषधीराप आस्तामिन्द्रावरुणा महिमानमाशत ।

8.059.02c या सिस्रतू रजसः पारे अध्वनो ययोः शत्रुर्नकिरादेव ओहते ॥

8.059.03a सत्यं तदिन्द्रावरुणा कृशस्य वां मध्व ऊर्मिं दुहते सप्त वाणीः ।

8.059.03c ताभिर्दाश्वांसमवतं शुभस्पती यो वामदब्धो अभि पाति चित्तिभिः ॥

8.059.04a घृतप्रुषः सौम्या जीरदानवः सप्त स्वसारः सदन ऋतस्य ।

8.059.04c या ह वामिन्द्रावरुणा घृतश्चुतस्ताभिर्धत्तं यजमानाय शिक्षतम् ॥

8.059.05a अवोचाम महते सौभगाय सत्यं त्वेषाभ्यां महिमानमिन्द्रियम् ।

8.059.05c अस्मान्स्विन्द्रावरुणा घृतश्चुतस्त्रिभिः साप्तेभिरवतं शुभस्पती ॥

8.059.06a इन्द्रावरुणा यदृषिभ्यो मनीषां वाचो मतिं श्रुतमदत्तमग्रे ।

8.059.06c यानि स्थानान्यसृजन्त धीरा यज्ञं तन्वानास्तपसाभ्यपश्यम् ॥

8.059.07a इन्द्रावरुणा सौमनसमदृप्तं रायस्पोषं यजमानेषु धत्तम् ।

8.059.07c प्रजां पुष्टिं भूतिमस्मासु धत्तं दीर्घायुत्वाय प्र तिरतं न आयुः ॥

8.060.01a अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।

8.060.01c आ त्वामनक्तु प्रयता हविष्मती यजिष्ठं बर्हिरासदे ॥

8.060.02a अच्छा हि त्वा सहसः सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।

8.060.02c ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥

8.060.03a अग्ने कविर्वेधा असि होता पावक यक्ष्यः ।

8.060.03c मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः ॥

8.060.04a अद्रोघमा वहोशतो यविष्ठ्य देवाँ अजस्र वीतये ।

8.060.04c अभि प्रयांसि सुधिता वसो गहि मन्दस्व धीतिभिर्हितः ॥

8.060.05a त्वमित्सप्रथा अस्यग्ने त्रातरृतस्कविः ।

8.060.05c त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः ॥

8.060.06a शोचा शोचिष्ठ दीदिहि विशे मयो रास्व स्तोत्रे महाँ असि ।

8.060.06c देवानां शर्मन्मम सन्तु सूरयः शत्रूषाहः स्वग्नयः ॥

8.060.07a यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि ।

8.060.07c एवा दह मित्रमहो यो अस्मध्रुग्दुर्मन्मा कश्च वेनति ॥

8.060.08a मा नो मर्ताय रिपवे रक्षस्विने माघशंसाय रीरधः ।

8.060.08c अस्रेधद्भिस्तरणिभिर्यविष्ठ्य शिवेभिः पाहि पायुभिः ॥

8.060.09a पाहि नो अग्न एकया पाह्युत द्वितीयया ।

8.060.09c पाहि गीर्भिस्तिसृभिरूर्जां पते पाहि चतसृभिर्वसो ॥

8.060.10a पाहि विश्वस्माद्रक्षसो अराव्णः प्र स्म वाजेषु नोऽव ।

8.060.10c त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षामहे वृधे ॥

8.060.11a आ नो अग्ने वयोवृधं रयिं पावक शंस्यम् ।

8.060.11c रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरम् ॥

8.060.12a येन वंसाम पृतनासु शर्धतस्तरन्तो अर्य आदिशः ।

8.060.12c स त्वं नो वर्ध प्रयसा शचीवसो जिन्वा धियो वसुविदः ॥

8.060.13a शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत् ।

8.060.13c तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः ॥

8.060.14a नहि ते अग्ने वृषभ प्रतिधृषे जम्भासो यद्वितिष्ठसे ।

8.060.14c स त्वं नो होतः सुहुतं हविष्कृधि वंस्वा नो वार्या पुरु ॥

8.060.15a शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते ।

8.060.15c अतन्द्रो हव्या वहसि हविष्कृत आदिद्देवेषु राजसि ॥

8.060.16a सप्त होतारस्तमिदीळते त्वाग्ने सुत्यजमह्रयम् ।

8.060.16c भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति ॥

8.060.17a अग्निमग्निं वो अध्रिगुं हुवेम वृक्तबर्हिषः ।

8.060.17c अग्निं हितप्रयसः शश्वतीष्वा होतारं चर्षणीनाम् ॥

8.060.18a केतेन शर्मन्सचते सुषामण्यग्ने तुभ्यं चिकित्वना ।

8.060.18c इषण्यया नः पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥

8.060.19a अग्ने जरितर्विश्पतिस्तेपानो देव रक्षसः ।

8.060.19c अप्रोषिवान्गृहपतिर्महाँ असि दिवस्पायुर्दुरोणयुः ॥

8.060.20a मा नो रक्ष आ वेशीदाघृणीवसो मा यातुर्यातुमावताम् ।

8.060.20c परोगव्यूत्यनिरामप क्षुधमग्ने सेध रक्षस्विनः ॥

8.061.01a उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।

8.061.01c सत्राच्या मघवा सोमपीतये धिया शविष्ठ आ गमत् ॥

8.061.02a तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।

8.061.02c उतोपमानां प्रथमो नि षीदसि सोमकामं हि ते मनः ॥

8.061.03a आ वृषस्व पुरूवसो सुतस्येन्द्रान्धसः ।

8.061.03c विद्मा हि त्वा हरिवः पृत्सु सासहिमधृष्टं चिद्दधृष्वणिम् ॥

8.061.04a अप्रामिसत्य मघवन्तथेदसदिन्द्र क्रत्वा यथा वशः ।

8.061.04c सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः ॥

8.061.05a शग्ध्यू३ षु शचीपत इन्द्र विश्वाभिरूतिभिः ।

8.061.05c भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥

8.061.06a पौरो अश्वस्य पुरुकृद्गवामस्युत्सो देव हिरण्ययः ।

8.061.06c नकिर्हि दानं परिमर्धिषत्त्वे यद्यद्यामि तदा भर ॥

8.061.07a त्वं ह्येहि चेरवे विदा भगं वसुत्तये ।

8.061.07c उद्वावृषस्व मघवन्गविष्टय उदिन्द्राश्वमिष्टये ॥

8.061.08a त्वं पुरू सहस्राणि शतानि च यूथा दानाय मंहसे ।

8.061.08c आ पुरंदरं चकृम विप्रवचस इन्द्रं गायन्तोऽवसे ॥

8.061.09a अविप्रो वा यदविधद्विप्रो वेन्द्र ते वचः ।

8.061.09c स प्र ममन्दत्त्वाया शतक्रतो प्राचामन्यो अहंसन ॥

8.061.10a उग्रबाहुर्म्रक्षकृत्वा पुरंदरो यदि मे शृणवद्धवम् ।

8.061.10c वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे ॥

8.061.11a न पापासो मनामहे नारायासो न जळ्हवः ।

8.061.11c यदिन्न्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै ॥

8.061.12a उग्रं युयुज्म पृतनासु सासहिमृणकातिमदाभ्यम् ।

8.061.12c वेदा भृमं चित्सनिता रथीतमो वाजिनं यमिदू नशत् ॥

8.061.13a यत इन्द्र भयामहे ततो नो अभयं कृधि ।

8.061.13c मघवञ्छग्धि तव तन्न ऊतिभिर्वि द्विषो वि मृधो जहि ॥

8.061.14a त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः ।

8.061.14c तं त्वा वयं मघवन्निन्द्र गिर्वणः सुतावन्तो हवामहे ॥

8.061.15a इन्द्र स्पळुत वृत्रहा परस्पा नो वरेण्यः ।

8.061.15c स नो रक्षिषच्चरमं स मध्यमं स पश्चात्पातु नः पुरः ॥

8.061.16a त्वं नः पश्चादधरादुत्तरात्पुर इन्द्र नि पाहि विश्वतः ।

8.061.16c आरे अस्मत्कृणुहि दैव्यं भयमारे हेतीरदेवीः ॥

8.061.17a अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ।

8.061.17c विश्वा च नो जरितॄन्सत्पते अहा दिवा नक्तं च रक्षिषः ॥

8.061.18a प्रभङ्गी शूरो मघवा तुवीमघः सम्मिश्लो विर्याय कम् ।

8.061.18c उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः ॥

8.062.01a प्रो अस्मा उपस्तुतिं भरता यज्जुजोषति ।

8.062.01c उक्थैरिन्द्रस्य माहिनं वयो वर्धन्ति सोमिनो भद्रा इन्द्रस्य रातयः ॥

8.062.02a अयुजो असमो नृभिरेकः कृष्टीरयास्यः ।

8.062.02c पूर्वीरति प्र वावृधे विश्वा जातान्योजसा भद्रा इन्द्रस्य रातयः ॥

8.062.03a अहितेन चिदर्वता जीरदानुः सिषासति ।

8.062.03c प्रवाच्यमिन्द्र तत्तव वीर्याणि करिष्यतो भद्रा इन्द्रस्य रातयः ॥

8.062.04a आ याहि कृणवाम त इन्द्र ब्रह्माणि वर्धना ।

8.062.04c येभिः शविष्ठ चाकनो भद्रमिह श्रवस्यते भद्रा इन्द्रस्य रातयः ॥

8.062.05a धृषतश्चिद्धृषन्मनः कृणोषीन्द्र यत्त्वम् ।

8.062.05c तीव्रैः सोमैः सपर्यतो नमोभिः प्रतिभूषतो भद्रा इन्द्रस्य रातयः ॥

8.062.06a अव चष्ट ऋचीषमोऽवताँ इव मानुषः ।

8.062.06c जुष्ट्वी दक्षस्य सोमिनः सखायं कृणुते युजं भद्रा इन्द्रस्य रातयः ॥

8.062.07a विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः ।

8.062.07c भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः ॥

8.062.08a गृणे तदिन्द्र ते शव उपमं देवतातये ।

8.062.08c यद्धंसि वृत्रमोजसा शचीपते भद्रा इन्द्रस्य रातयः ॥

8.062.09a समनेव वपुष्यतः कृणवन्मानुषा युगा ।

8.062.09c विदे तदिन्द्रश्चेतनमध श्रुतो भद्रा इन्द्रस्य रातयः ॥

8.062.10a उज्जातमिन्द्र ते शव उत्त्वामुत्तव क्रतुम् ।

8.062.10c भूरिगो भूरि वावृधुर्मघवन्तव शर्मणि भद्रा इन्द्रस्य रातयः ॥

8.062.11a अहं च त्वं च वृत्रहन्सं युज्याव सनिभ्य आ ।

8.062.11c अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ॥

8.062.12a सत्यमिद्वा उ तं वयमिन्द्रं स्तवाम नानृतम् ।

8.062.12c महाँ असुन्वतो वधो भूरि ज्योतींषि सुन्वतो भद्रा इन्द्रस्य रातयः ॥

8.063.01a स पूर्व्यो महानां वेनः क्रतुभिरानजे ।

8.063.01c यस्य द्वारा मनुष्पिता देवेषु धिय आनजे ॥

8.063.02a दिवो मानं नोत्सदन्सोमपृष्ठासो अद्रयः ।

8.063.02c उक्था ब्रह्म च शंस्या ॥

8.063.03a स विद्वाँ अङ्गिरोभ्य इन्द्रो गा अवृणोदप ।

8.063.03c स्तुषे तदस्य पौंस्यम् ॥

8.063.04a स प्रत्नथा कविवृध इन्द्रो वाकस्य वक्षणिः ।

8.063.04c शिवो अर्कस्य होमन्यस्मत्रा गन्त्ववसे ॥

8.063.05a आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः ।

8.063.05c श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने ॥

8.063.06a इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च ।

8.063.06c यमर्का अध्वरं विदुः ॥

8.063.07a यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत ।

8.063.07c अस्तृणाद्बर्हणा विपो३ऽर्यो मानस्य स क्षयः ॥

8.063.08a इयमु ते अनुष्टुतिश्चकृषे तानि पौंस्या ।

8.063.08c प्रावश्चक्रस्य वर्तनिम् ॥

8.063.09a अस्य वृष्णो व्योदन उरु क्रमिष्ट जीवसे ।

8.063.09c यवं न पश्व आ ददे ॥

8.063.10a तद्दधाना अवस्यवो युष्माभिर्दक्षपितरः ।

8.063.10c स्याम मरुत्वतो वृधे ॥

8.063.11a बळृत्वियाय धाम्न ऋक्वभिः शूर नोनुमः ।

8.063.11c जेषामेन्द्र त्वया युजा ॥

8.063.12a अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः ।

8.063.12c यः शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः ॥

8.064.01a उत्त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः ।

8.064.01c अव ब्रह्मद्विषो जहि ॥

8.064.02a पदा पणीँरराधसो नि बाधस्व महाँ असि ।

8.064.02c नहि त्वा कश्चन प्रति ॥

8.064.03a त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् ।

8.064.03c त्वं राजा जनानाम् ॥

8.064.04a एहि प्रेहि क्षयो दिव्या३घोषञ्चर्षणीनाम् ।

8.064.04c ओभे पृणासि रोदसी ॥

8.064.05a त्यं चित्पर्वतं गिरिं शतवन्तं सहस्रिणम् ।

8.064.05c वि स्तोतृभ्यो रुरोजिथ ॥

8.064.06a वयमु त्वा दिवा सुते वयं नक्तं हवामहे ।

8.064.06c अस्माकं काममा पृण ॥

8.064.07a क्व१ स्य वृषभो युवा तुविग्रीवो अनानतः ।

8.064.07c ब्रह्मा कस्तं सपर्यति ॥

8.064.08a कस्य स्वित्सवनं वृषा जुजुष्वाँ अव गच्छति ।

8.064.08c इन्द्रं क उ स्विदा चके ॥

8.064.09a कं ते दाना असक्षत वृत्रहन्कं सुवीर्या ।

8.064.09c उक्थे क उ स्विदन्तमः ॥

8.064.10a अयं ते मानुषे जने सोमः पूरुषु सूयते।

8.064.10c तस्येहि प्र द्रवा पिब॥

8.064.11a अयं ते शर्यणावति सुषोमायामधि प्रियः।

8.064.11c आर्जीकीये मदिन्तमः॥

8.064.12a तमद्य राधसे महे चारुं मदाय घृष्वये।

8.064.12c एहीमिन्द्र द्रवा पिब॥

8.065.01a यदिन्द्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः।

8.065.01c आ याहि तूयमाशुभिः॥

8.065.02a यद्वा प्रस्रवणे दिवो मादयासे स्वर्णरे।

8.065.02c यद्वा समुद्रे अन्धसः॥

8.065.03a आ त्वा गीर्भिर्महामुरुं हुवे गामिव भोजसे।

8.065.03c इन्द्र सोमस्य पीतये॥

8.065.04a आ त इन्द्र महिमानं हरयो देव ते महः।

8.065.04c रथे वहन्तु बिभ्रतः॥

8.065.05a इन्द्र गृणीष उ स्तुषे महाँ उग्र ईशानकृत्।

8.065.05c एहि नः सुतं पिब॥

8.065.06a सुतावन्तस्त्वा वयं प्रयस्वन्तो हवामहे।

8.065.06c इदं नो बर्हिरासदे ॥

8.065.07a यच्चिद्धि शश्वतामसीन्द्र साधारणस्त्वम् ।

8.065.07c तं त्वा वयं हवामहे ॥

8.065.08a इदं ते सोम्यं मध्वधुक्षन्नद्रिभिर्नरः ।

8.065.08c जुषाण इन्द्र तत्पिब ॥

8.065.09a विश्वाँ अर्यो विपश्चितोऽति ख्यस्तूयमा गहि ।

8.065.09c अस्मे धेहि श्रवो बृहत् ॥

8.065.10a दाता मे पृषतीनां राजा हिरण्यवीनाम् ।

8.065.10c मा देवा मघवा रिषत् ॥

8.065.11a सहस्रे पृषतीनामधि श्चन्द्रं बृहत्पृथु ।

8.065.11c शुक्रं हिरण्यमा ददे ॥

8.065.12a नपातो दुर्गहस्य मे सहस्रेण सुराधसः ।

8.065.12c श्रवो देवेष्वक्रत ॥

8.066.01a तरोभिर्वो विदद्वसुमिन्द्रं सबाध ऊतये ।

8.066.01c बृहद्गायन्तः सुतसोमे अध्वरे हुवे भरं न कारिणम् ॥

8.066.02a न यं दुध्रा वरन्ते न स्थिरा मुरो मदे सुशिप्रमन्धसः ।

8.066.02c य आदृत्या शशमानाय सुन्वते दाता जरित्र उक्थ्यम् ॥

8.066.03a यः शक्रो मृध्रो अश्व्यो यो वा कीजो हिरण्ययः ।

8.066.03c स ऊर्वस्य रेजयत्यपावृतिमिन्द्रो गव्यस्य वृत्रहा ॥

8.066.04a निखातं चिद्यः पुरुसम्भृतं वसूदिद्वपति दाशुषे ।

8.066.04c वज्री सुशिप्रो हर्यश्व इत्करदिन्द्रः क्रत्वा यथा वशत् ॥

8.066.05a यद्वावन्थ पुरुष्टुत पुरा चिच्छूर नृणाम् ।

8.066.05c वयं तत्त इन्द्र सं भरामसि यज्ञमुक्थं तुरं वचः ॥

8.066.06a सचा सोमेषु पुरुहूत वज्रिवो मदाय द्युक्ष सोमपाः ।

8.066.06c त्वमिद्धि ब्रह्मकृते काम्यं वसु देष्ठः सुन्वते भुवः ॥

8.066.07a वयमेनमिदा ह्योऽपीपेमेह वज्रिणम् ।

8.066.07c तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते ॥

8.066.08a वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति ।

8.066.08c सेमं न स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया ॥

8.066.09a कदू न्वस्याकृतमिन्द्रस्यास्ति पौंस्यम् ।

8.066.09c केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥

8.066.10a कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ।

8.066.10c इन्द्रो विश्वान्बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि ॥

8.066.11a वयं घा ते अपूर्व्येन्द्र ब्रह्माणि वृत्रहन् ।

8.066.11c पुरूतमासः पुरुहूत वज्रिवो भृतिं न प्र भरामसि ॥

8.066.12a पूर्वीश्चिद्धि त्वे तुविकूर्मिन्नाशसो हवन्त इन्द्रोतयः ।

8.066.12c तिरश्चिदर्यः सवना वसो गहि शविष्ठ श्रुधि मे हवम् ॥

8.066.13a वयं घा ते त्वे इद्विन्द्र विप्रा अपि ष्मसि ।

8.066.13c नहि त्वदन्यः पुरुहूत कश्चन मघवन्नस्ति मर्डिता ॥

8.066.14a त्वं नो अस्या अमतेरुत क्षुधो३ऽभिशस्तेरव स्पृधि ।

8.066.14c त्वं न ऊती तव चित्रया धिया शिक्षा शचिष्ठ गातुवित् ॥

8.066.15a सोम इद्वः सुतो अस्तु कलयो मा बिभीतन ।

8.066.15c अपेदेष ध्वस्मायति स्वयं घैषो अपायति ॥

8.067.01a त्यान्नु क्षत्रियाँ अव आदित्यान्याचिषामहे ।

8.067.01c सुमृळीकाँ अभिष्टये ॥

8.067.02a मित्रो नो अत्यंहतिं वरुणः पर्षदर्यमा ।

8.067.02c आदित्यासो यथा विदुः ॥

8.067.03a तेषां हि चित्रमुक्थ्यं१ वरूथमस्ति दाशुषे ।

8.067.03c आदित्यानामरंकृते ॥

8.067.04a महि वो महतामवो वरुण मित्रार्यमन् ।

8.067.04c अवांस्या वृणीमहे ॥

8.067.05a जीवान्नो अभि धेतनादित्यासः पुरा हथात् ।

8.067.05c कद्ध स्थ हवनश्रुतः ॥

8.067.06a यद्वः श्रान्ताय सुन्वते वरूथमस्ति यच्छर्दिः ।

8.067.06c तेना नो अधि वोचत ॥

8.067.07a अस्ति देवा अंहोरुर्वस्ति रत्नमनागसः ।

8.067.07c आदित्या अद्भुतैनसः ॥

8.067.08a मा नः सेतुः सिषेदयं महे वृणक्तु नस्परि ।

8.067.08c इन्द्र इद्धि श्रुतो वशी ॥

8.067.09a मा नो मृचा रिपूणां वृजिनानामविष्यवः ।

8.067.09c देवा अभि प्र मृक्षत ॥

8.067.10a उत त्वामदिते मह्यहं देव्युप ब्रुवे ।

8.067.10c सुमृळीकामभिष्टये ॥

8.067.11a पर्षि दीने गभीर आँ उग्रपुत्रे जिघांसतः ।

8.067.11c माकिस्तोकस्य नो रिषत् ॥

8.067.12a अनेहो न उरुव्रज उरूचि वि प्रसर्तवे ।

8.067.12c कृधि तोकाय जीवसे ॥

8.067.13a ये मूर्धानः क्षितीनामदब्धासः स्वयशसः ।

8.067.13c व्रता रक्षन्ते अद्रुहः ॥

8.067.14a ते न आस्नो वृकाणामादित्यासो मुमोचत ।

8.067.14c स्तेनं बद्धमिवादिते ॥

8.067.15a अपो षु ण इयं शरुरादित्या अप दुर्मतिः ।

8.067.15c अस्मदेत्वजघ्नुषी ॥

8.067.16a शश्वद्धि वः सुदानव आदित्या ऊतिभिर्वयम् ।

8.067.16c पुरा नूनं बुभुज्महे ॥

8.067.17a शश्वन्तं हि प्रचेतसः प्रतियन्तं चिदेनसः ।

8.067.17c देवाः कृणुथ जीवसे ॥

8.067.18a तत्सु नो नव्यं सन्यस आदित्या यन्मुमोचति ।

8.067.18c बन्धाद्बद्धमिवादिते ॥

8.067.19a नास्माकमस्ति तत्तर आदित्यासो अतिष्कदे ।

8.067.19c यूयमस्मभ्यं मृळत ॥

8.067.20a मा नो हेतिर्विवस्वत आदित्याः कृत्रिमा शरुः ।

8.067.20c पुरा नु जरसो वधीत् ॥

8.067.21a वि षु द्वेषो व्यंहतिमादित्यासो वि संहितम् ।

8.067.21c विष्वग्वि वृहता रपः ॥

8.068.01a आ त्वा रथं यथोतये सुम्नाय वर्तयामसि ।

8.068.01c तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते ॥

8.068.02a तुविशुष्म तुविक्रतो शचीवो विश्वया मते ।

8.068.02c आ पप्राथ महित्वना ॥

8.068.03a यस्य ते महिना महः परि ज्मायन्तमीयतुः ।

8.068.03c हस्ता वज्रं हिरण्ययम् ॥

8.068.04a विश्वानरस्य वस्पतिमनानतस्य शवसः ।

8.068.04c एवैश्च चर्षणीनामूती हुवे रथानाम् ॥

8.068.05a अभिष्टये सदावृधं स्वर्मीळ्हेषु यं नरः ।

8.068.05c नाना हवन्त ऊतये ॥

8.068.06a परोमात्रमृचीषममिन्द्रमुग्रं सुराधसम् ।

8.068.06c ईशानं चिद्वसूनाम् ॥

8.068.07a तंतमिद्राधसे मह इन्द्रं चोदामि पीतये ।

8.068.07c यः पूर्व्यामनुष्टुतिमीशे कृष्टीनां नृतुः ॥

8.068.08a न यस्य ते शवसान सख्यमानंश मर्त्यः ।

8.068.08c नकिः शवांसि ते नशत् ॥

8.068.09a त्वोतासस्त्वा युजाप्सु सूर्ये महद्धनम् ।

8.068.09c जयेम पृत्सु वज्रिवः ॥

8.068.10a तं त्वा यज्ञेभिरीमहे तं गीर्भिर्गिर्वणस्तम ।

8.068.10c इन्द्र यथा चिदाविथ वाजेषु पुरुमाय्यम् ॥

8.068.11a यस्य ते स्वादु सख्यं स्वाद्वी प्रणीतिरद्रिवः ।

8.068.11c यज्ञो वितन्तसाय्यः ॥

8.068.12a उरु णस्तन्वे३ तन उरु क्षयाय नस्कृधि ।

8.068.12c उरु णो यन्धि जीवसे ॥

8.068.13a उरुं नृभ्य उरुं गव उरुं रथाय पन्थाम् ।

8.068.13c देववीतिं मनामहे ॥

8.068.14a उप मा षड्द्वाद्वा नरः सोमस्य हर्ष्या ।

8.068.14c तिष्ठन्ति स्वादुरातयः ॥

8.068.15a ऋज्राविन्द्रोत आ ददे हरी ऋक्षस्य सूनवि ।

8.068.15c आश्वमेधस्य रोहिता ॥

8.068.16a सुरथाँ आतिथिग्वे स्वभीशूँरार्क्षे ।

8.068.16c आश्वमेधे सुपेशसः ॥

8.068.17a षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः ।

8.068.17c सचा पूतक्रतौ सनम् ॥

8.068.18a ऐषु चेतद्वृषण्वत्यन्तर्ऋज्रेष्वरुषी ।

8.068.18c स्वभीशुः कशावती ॥

8.068.19a न युष्मे वाजबन्धवो निनित्सुश्चन मर्त्यः ।

8.068.19c अवद्यमधि दीधरत् ॥

8.069.01a प्रप्र वस्त्रिष्टुभमिषं मन्दद्वीरायेन्दवे ।

8.069.01c धिया वो मेधसातये पुरंध्या विवासति ॥

8.069.02a नदं व ओदतीनां नदं योयुवतीनाम् ।

8.069.02c पतिं वो अघ्न्यानां धेनूनामिषुध्यसि ॥

8.069.03a ता अस्य सूददोहसः सोमं श्रीणन्ति पृश्नयः ।

8.069.03c जन्मन्देवानां विशस्त्रिष्वा रोचने दिवः ॥

8.069.04a अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे ।

8.069.04c सूनुं सत्यस्य सत्पतिम् ॥

8.069.05a आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि ।

8.069.05c यत्राभि संनवामहे ॥

8.069.06a इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु ।

8.069.06c यत्सीमुपह्वरे विदत् ॥

8.069.07a उद्यद्ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि ।

8.069.07c मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥

8.069.08a अर्चत प्रार्चत प्रियमेधासो अर्चत ।

8.069.08c अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥

8.069.09a अव स्वराति गर्गरो गोधा परि सनिष्वणत् ।

8.069.09c पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम् ॥

8.069.10a आ यत्पतन्त्येन्यः सुदुघा अनपस्फुरः ।

8.069.10c अपस्फुरं गृभायत सोममिन्द्राय पातवे ॥

8.069.11a अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।

8.069.11c वरुण इदिह क्षयत्तमापो अभ्यनूषत वत्सं संशिश्वरीरिव ॥

8.069.12a सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।

8.069.12c अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥

8.069.13a यो व्यतीँरफाणयत्सुयुक्ताँ उप दाशुषे ।

8.069.13c तक्वो नेता तदिद्वपुरुपमा यो अमुच्यत ॥

8.069.14a अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः ।

8.069.14c भिनत्कनीन ओदनं पच्यमानं परो गिरा ॥

8.069.15a अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम् ।

8.069.15c स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् ॥

8.069.16a आ तू सुशिप्र दम्पते रथं तिष्ठा हिरण्ययम् ।

8.069.16c अध द्युक्षं सचेवहि सहस्रपादमरुषं स्वस्तिगामनेहसम् ॥

8.069.17a तं घेमित्था नमस्विन उप स्वराजमासते ।

8.069.17c अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने ॥

8.069.18a अनु प्रत्नस्यौकसः प्रियमेधास एषाम् ।

8.069.18c पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥

8.070.01a यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।

8.070.01c विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥

8.070.02a इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।

8.070.02c हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥

8.070.03a नकिष्टं कर्मणा नशद्यश्चकार सदावृधम् ।

8.070.03c इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं धृष्ण्वोजसम् ॥

8.070.04a अषाळ्हमुग्रं पृतनासु सासहिं यस्मिन्महीरुरुज्रयः ।

8.070.04c सं धेनवो जायमाने अनोनवुर्द्यावः क्षामो अनोनवुः ॥

8.070.05a यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।

8.070.05c न त्वा वज्रिन्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥

8.070.06a आ पप्राथ महिना वृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।

8.070.06c अस्माँ अव मघवन्गोमति व्रजे वज्रिञ्चित्राभिरूतिभिः ॥

8.070.07a न सीमदेव आपदिषं दीर्घायो मर्त्यः ।

8.070.07c एतग्वा चिद्य एतशा युयोजते हरी इन्द्रो युयोजते ॥

8.070.08a तं वो महो महाय्यमिन्द्रं दानाय सक्षणिम् ।

8.070.08c यो गाधेषु य आरणेषु हव्यो वाजेष्वस्ति हव्यः ॥

8.070.09a उदू षु णो वसो महे मृशस्व शूर राधसे ।

8.070.09c उदू षु मह्यै मघवन्मघत्तय उदिन्द्र श्रवसे महे ॥

8.070.10a त्वं न इन्द्र ऋतयुस्त्वानिदो नि तृम्पसि ।

8.070.10c मध्ये वसिष्व तुविनृम्णोर्वोर्नि दासं शिश्नथो हथैः ॥

8.070.11a अन्यव्रतममानुषमयज्वानमदेवयुम् ।

8.070.11c अव स्वः सखा दुधुवीत पर्वतः सुघ्नाय दस्युं पर्वतः ॥

8.070.12a त्वं न इन्द्रासां हस्ते शविष्ठ दावने ।

8.070.12c धानानां न सं गृभायास्मयुर्द्विः सं गृभायास्मयुः ॥

8.070.13a सखायः क्रतुमिच्छत कथा राधाम शरस्य ।

8.070.13c उपस्तुतिं भोजः सूरिर्यो अह्रयः ॥

8.070.14a भूरिभिः समह ऋषिभिर्बर्हिष्मद्भि स्तविष्यसे ।

8.070.14c यदित्थमेकमेकमिच्छर वत्सान्पराददः ॥

8.070.15a कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत् ।

8.070.15c अजां सूरिर्न धातवे ॥

8.071.01a त्वं नो अग्ने महोभिः पाहि विश्वस्या अरातेः ।

8.071.01c उत द्विषो मर्त्यस्य ॥

8.071.02a नहि मन्युः पौरुषेय ईशे हि वः प्रियजात ।

8.071.02c त्वमिदसि क्षपावान् ॥

8.071.03a स नो विश्वेभिर्देवेभिरूर्जो नपाद्भद्रशोचे ।

8.071.03c रयिं देहि विश्ववारम् ॥

8.071.04a न तमग्ने अरातयो मर्तं युवन्त रायः ।

8.071.04c यं त्रायसे दाश्वांसम् ॥

8.071.05a यं त्वं विप्र मेधसातावग्ने हिनोषि धनाय ।

8.071.05c स तवोती गोषु गन्ता ॥

8.071.06a त्वं रयिं पुरुवीरमग्ने दाशुषे मर्ताय ।

8.071.06c प्र णो नय वस्यो अच्छ ॥

8.071.07a उरुष्या णो मा परा दा अघायते जातवेदः ।

8.071.07c दुराध्ये३ मर्ताय ॥

8.071.08a अग्ने माकिष्टे देवस्य रातिमदेवो युयोत ।

8.071.08c त्वमीशिषे वसूनाम् ॥

8.071.09a स नो वस्व उप मास्यूर्जो नपान्माहिनस्य ।

8.071.09c सखे वसो जरितृभ्यः ॥

8.071.10a अच्छा नः शीरशोचिषं गिरो यन्तु दर्शतम् ।

8.071.10c अच्छा यज्ञासो नमसा पुरूवसुं पुरुप्रशस्तमूतये ॥

8.071.11a अग्निं सूनुं सहसो जातवेदसं दानाय वार्याणाम् ।

8.071.11c द्विता यो भूदमृतो मर्त्येष्वा होता मन्द्रतमो विशि ॥

8.071.12a अग्निं वो देवयज्ययाग्निं प्रयत्यध्वरे ।

8.071.12c अग्निं धीषु प्रथममग्निमर्वत्यग्निं क्षैत्राय साधसे ॥

8.071.13a अग्निरिषां सख्ये ददातु न ईशे यो वार्याणाम् ।

8.071.13c अग्निं तोके तनये शश्वदीमहे वसुं सन्तं तनूपाम् ॥

8.071.14a अग्निमीळिष्वावसे गाथाभिः शीरशोचिषम् ।

8.071.14c अग्निं राये पुरुमीळ्ह श्रुतं नरोऽग्निं सुदीतये छर्दिः ॥

8.071.15a अग्निं द्वेषो योतवै नो गृणीमस्यग्निं शं योश्च दातवे ।

8.071.15c विश्वासु विक्ष्ववितेव हव्यो भुवद्वस्तुरृषूणाम् ॥

8.072.01a हविष्कृणुध्वमा गमदध्वर्युर्वनते पुनः ।

8.072.01c विद्वाँ अस्य प्रशासनम् ॥

8.072.02a नि तिग्ममभ्यं१शुं सीदद्धोता मनावधि ।

8.072.02c जुषाणो अस्य सख्यम् ॥

8.072.03a अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया ।

8.072.03c गृभ्णन्ति जिह्वया ससम् ॥

8.072.04a जाम्यतीतपे धनुर्वयोधा अरुहद्वनम् ।

8.072.04c दृषदं जिह्वयावधीत् ॥

8.072.05a चरन्वत्सो रुशन्निह निदातारं न विन्दते ।

8.072.05c वेति स्तोतव अम्ब्यम् ॥

8.072.06a उतो न्वस्य यन्महदश्वावद्योजनं बृहद् ।

8.072.06c दामा रथस्य ददृशे ॥

8.072.07a दुहन्ति सप्तैकामुप द्वा पञ्च सृजतः ।

8.072.07c तीर्थे सिन्धोरधि स्वरे ॥

8.072.08a आ दशभिर्विवस्वत इन्द्रः कोशमचुच्यवीत् ।

8.072.08c खेदया त्रिवृता दिवः ॥

8.072.09a परि त्रिधातुरध्वरं जूर्णिरेति नवीयसी ।

8.072.09c मध्वा होतारो अञ्जते ॥

8.072.10a सिञ्चन्ति नमसावतमुच्चाचक्रं परिज्मानम् ।

8.072.10c नीचीनबारमक्षितम् ॥

8.072.11a अभ्यारमिदद्रयो निषिक्तं पुष्करे मधु ।

8.072.11c अवतस्य विसर्जने ॥

8.072.12a गाव उपावतावतं मही यज्ञस्य रप्सुदा ।

8.072.12c उभा कर्णा हिरण्यया ॥

8.072.13a आ सुते सिञ्चत श्रियं रोदस्योरभिश्रियम् ।

8.072.13c रसा दधीत वृषभम् ॥

8.072.14a ते जानत स्वमोक्यं१ सं वत्सासो न मातृभिः ।

8.072.14c मिथो नसन्त जामिभिः ॥

8.072.15a उप स्रक्वेषु बप्सतः कृण्वते धरुणं दिवि ।

8.072.15c इन्द्रे अग्ना नमः स्वः ॥

8.072.16a अधुक्षत्पिप्युषीमिषमूर्जं सप्तपदीमरिः ।

8.072.16c सूर्यस्य सप्त रश्मिभिः ॥

8.072.17a सोमस्य मित्रावरुणोदिता सूर आ ददे ।

8.072.17c तदातुरस्य भेषजम् ॥

8.072.18a उतो न्वस्य यत्पदं हर्यतस्य निधान्यम् ।

8.072.18c परि द्यां जिह्वयातनत् ॥

8.073.01a उदीराथामृतायते युञ्जाथामश्विना रथम् ।

8.073.01c अन्ति षद्भूतु वामवः ॥

8.073.02a निमिषश्चिज्जवीयसा रथेना यातमश्विना ।

8.073.02c अन्ति षद्भूतु वामवः ॥

8.073.03a उप स्तृणीतमत्रये हिमेन घर्ममश्विना ।

8.073.03c अन्ति षद्भूतु वामवः ॥

8.073.04a कुह स्थः कुह जग्मथुः कुह श्येनेव पेतथुः ।

8.073.04c अन्ति षद्भूतु वामवः ॥

8.073.05a यदद्य कर्हि कर्हि चिच्छुश्रूयातमिमं हवम् ।

8.073.05c अन्ति षद्भूतु वामवः ॥

8.073.06a अश्विना यामहूतमा नेदिष्ठं याम्याप्यम् ।

8.073.06c अन्ति षद्भूतु वामवः ॥

8.073.07a अवन्तमत्रये गृहं कृणुतं युवमश्विना ।

8.073.07c अन्ति षद्भूतु वामवः ॥

8.073.08a वरेथे अग्निमातपो वदते वल्ग्वत्रये ।

8.073.08c अन्ति षद्भूतु वामवः ॥

8.073.09a प्र सप्तवध्रिराशसा धारामग्नेरशायत ।

8.073.09c अन्ति षद्भूतु वामवः ॥

8.073.10a इहा गतं वृषण्वसू शृणुतं म इमं हवम् ।

8.073.10c अन्ति षद्भूतु वामवः ॥

8.073.11a किमिदं वां पुराणवज्जरतोरिव शस्यते ।

8.073.11c अन्ति षद्भूतु वामवः ॥

8.073.12a समानं वां सजात्यं समानो बन्धुरश्विना ।

8.073.12c अन्ति षद्भूतु वामवः ॥

8.073.13a यो वां रजांस्यश्विना रथो वियाति रोदसी ।

8.073.13c अन्ति षद्भूतु वामवः ॥

8.073.14a आ नो गव्येभिरश्व्यैः सहस्रैरुप गच्छतम् ।

8.073.14c अन्ति षद्भूतु वामवः ॥

8.073.15a मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम् ।

8.073.15c अन्ति षद्भूतु वामवः ॥

8.073.16a अरुणप्सुरुषा अभूदकर्ज्योतिर्ऋतावरी ।

8.073.16c अन्ति षद्भूतु वामवः ॥

8.073.17a अश्विना सु विचाकशद्वृक्षं परशुमाँ इव ।

8.073.17c अन्ति षद्भूतु वामवः ॥

8.073.18a पुरं न धृष्णवा रुज कृष्णया बाधितो विशा ।

8.073.18c अन्ति षद्भूतु वामवः ॥

8.074.01a विशोविशो वो अतिथिं वाजयन्तः पुरुप्रियम् ।

8.074.01c अग्निं वो दुर्यं वचः स्तुषे शूषस्य मन्मभिः ॥

8.074.02a यं जनासो हविष्मन्तो मित्रं न सर्पिरासुतिम् ।

8.074.02c प्रशंसन्ति प्रशस्तिभिः ॥

8.074.03a पन्यांसं जातवेदसं यो देवतात्युद्यता ।

8.074.03c हव्यान्यैरयद्दिवि ॥

8.074.04a आगन्म वृत्रहन्तमं ज्येष्ठमग्निमानवम् ।

8.074.04c यस्य श्रुतर्वा बृहन्नार्क्षो अनीक एधते ॥

8.074.05a अमृतं जातवेदसं तिरस्तमांसि दर्शतम् ।

8.074.05c घृताहवनमीड्यम् ॥

8.074.06a सबाधो यं जना इमे३ऽग्निं हव्येभिरीळते ।

8.074.06c जुह्वानासो यतस्रुचः ॥

8.074.07a इयं ते नव्यसी मतिरग्ने अधाय्यस्मदा ।

8.074.07c मन्द्र सुजात सुक्रतोऽमूर दस्मातिथे ॥

8.074.08a सा ते अग्ने शंतमा चनिष्ठा भवतु प्रिया ।

8.074.08c तया वर्धस्व सुष्टुतः ॥

8.074.09a सा द्युम्नैर्द्युम्निनी बृहदुपोप श्रवसि श्रवः ।

8.074.09c दधीत वृत्रतूर्ये ॥

8.074.10a अश्वमिद्गां रथप्रां त्वेषमिन्द्रं न सत्पतिम् ।

8.074.10c यस्य श्रवांसि तूर्वथ पन्यम्पन्यं च कृष्टयः ॥

8.074.11a यं त्वा गोपवनो गिरा चनिष्ठदग्ने अङ्गिरः ।

8.074.11c स पावक श्रुधी हवम् ॥

8.074.12a यं त्वा जनास ईळते सबाधो वाजसातये ।

8.074.12c स बोधि वृत्रतूर्ये ॥

8.074.13a अहं हुवान आर्क्षे श्रुतर्वणि मदच्युति ।

8.074.13c शर्धांसीव स्तुकाविनां मृक्षा शीर्षा चतुर्णाम् ॥

8.074.14a मां चत्वार आशवः शविष्ठस्य द्रवित्नवः ।

8.074.14c सुरथासो अभि प्रयो वक्षन्वयो न तुग्र्यम् ॥

8.074.15a सत्यमित्त्वा महेनदि परुष्ण्यव देदिशम् ।

8.074.15c नेमापो अश्वदातरः शविष्ठादस्ति मर्त्यः ॥

8.075.01a युक्ष्वा हि देवहूतमाँ अश्वाँ अग्ने रथीरिव ।

8.075.01c नि होता पूर्व्यः सदः ॥

8.075.02a उत नो देव देवाँ अच्छा वोचो विदुष्टरः ।

8.075.02c श्रद्विश्वा वार्या कृधि ॥

8.075.03a त्वं ह यद्यविष्ठ्य सहसः सूनवाहुत ।

8.075.03c ऋतावा यज्ञियो भुवः ॥

8.075.04a अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः ।

8.075.04c मूर्धा कवी रयीणाम् ॥

8.075.05a तं नेमिमृभवो यथा नमस्व सहूतिभिः ।

8.075.05c नेदीयो यज्ञमङ्गिरः ॥

8.075.06a तस्मै नूनमभिद्यवे वाचा विरूप नित्यया ।

8.075.06c वृष्णे चोदस्व सुष्टुतिम् ॥

8.075.07a कमु ष्विदस्य सेनयाग्नेरपाकचक्षसः ।

8.075.07c पणिं गोषु स्तरामहे ॥

8.075.08a मा नो देवानां विशः प्रस्नातीरिवोस्राः ।

8.075.08c कृशं न हासुरघ्न्याः ॥

8.075.09a मा नः समस्य दूढ्य१ः परिद्वेषसो अंहतिः ।

8.075.09c ऊर्मिर्न नावमा वधीत् ॥

8.075.10a नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः ।

8.075.10c अमैरमित्रमर्दय ॥

8.075.11a कुवित्सु नो गविष्टयेऽग्ने संवेषिषो रयिम् ।

8.075.11c उरुकृदुरु णस्कृधि ॥

8.075.12a मा नो अस्मिन्महाधने परा वर्ग्भारभृद्यथा ।

8.075.12c संवर्गं सं रयिं जय ॥

8.075.13a अन्यमस्मद्भिया इयमग्ने सिषक्तु दुच्छुना ।

8.075.13c वर्धा नो अमवच्छवः ॥

8.075.14a यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा ।

8.075.14c तं घेदग्निर्वृधावति ॥

8.075.15a परस्या अधि संवतोऽवराँ अभ्या तर ।

8.075.15c यत्राहमस्मि ताँ अव ॥

8.075.16a विद्मा हि ते पुरा वयमग्ने पितुर्यथावसः ।

8.075.16c अधा ते सुम्नमीमहे ॥

8.076.01a इमं नु मायिनं हुव इन्द्रमीशानमोजसा ।

8.076.01c मरुत्वन्तं न वृञ्जसे ॥

8.076.02a अयमिन्द्रो मरुत्सखा वि वृत्रस्याभिनच्छिरः ।

8.076.02c वज्रेण शतपर्वणा ॥

8.076.03a वावृधानो मरुत्सखेन्द्रो वि वृत्रमैरयत् ।

8.076.03c सृजन्समुद्रिया अपः ॥

8.076.04a अयं ह येन वा इदं स्वर्मरुत्वता जितम् ।

8.076.04c इन्द्रेण सोमपीतये ॥

8.076.05a मरुत्वन्तमृजीषिणमोजस्वन्तं विरप्शिनम् ।

8.076.05c इन्द्रं गीर्भिर्हवामहे ॥

8.076.06a इन्द्रं प्रत्नेन मन्मना मरुत्वन्तं हवामहे ।

8.076.06c अस्य सोमस्य पीतये ॥

8.076.07a मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो ।

8.076.07c अस्मिन्यज्ञे पुरुष्टुत ॥

8.076.08a तुभ्येदिन्द्र मरुत्वते सुताः सोमासो अद्रिवः ।

8.076.08c हृदा हूयन्त उक्थिनः ॥

8.076.09a पिबेदिन्द्र मरुत्सखा सुतं सोमं दिविष्टिषु ।

8.076.09c वज्रं शिशान ओजसा ॥

8.076.10a उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः ।

8.076.10c सोममिन्द्र चमू सुतम् ॥

8.076.11a अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम् ।

8.076.11c इन्द्र यद्दस्युहाभवः ॥

8.076.12a वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् ।

8.076.12c इन्द्रात्परि तन्वं ममे ॥

8.077.01a जज्ञानो नु शतक्रतुर्वि पृच्छदिति मातरम् ।

8.077.01c क उग्राः के ह शृण्विरे ॥

8.077.02a आदीं शवस्यब्रवीदौर्णवाभमहीशुवम् ।

8.077.02c ते पुत्र सन्तु निष्टुरः ॥

8.077.03a समित्तान्वृत्रहाखिदत्खे अराँ इव खेदया ।

8.077.03c प्रवृद्धो दस्युहाभवत् ॥

8.077.04a एकया प्रतिधापिबत्साकं सरांसि त्रिंशतम् ।

8.077.04c इन्द्रः सोमस्य काणुका ॥

8.077.05a अभि गन्धर्वमतृणदबुध्नेषु रजस्स्वा ।

8.077.05c इन्द्रो ब्रह्मभ्य इद्वृधे ॥

8.077.06a निराविध्यद्गिरिभ्य आ धारयत्पक्वमोदनम् ।

8.077.06c इन्द्रो बुन्दं स्वाततम् ॥

8.077.07a शतब्रध्न इषुस्तव सहस्रपर्ण एक इत् ।

8.077.07c यमिन्द्र चकृषे युजम् ॥

8.077.08a तेन स्तोतृभ्य आ भर नृभ्यो नारिभ्यो अत्तवे ।

8.077.08c सद्यो जात ऋभुष्ठिर ॥

8.077.09a एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा ।

8.077.09c हृदा वीड्वधारयः ॥

8.077.10a विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः ।

8.077.10c शतं महिषान्क्षीरपाकमोदनं वराहमिन्द्र एमुषम् ॥

8.077.11a तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः ।

8.077.11c उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा ॥

8.078.01a पुरोळाशं नो अन्धस इन्द्र सहस्रमा भर ।

8.078.01c शता च शूर गोनाम् ॥

8.078.02a आ नो भर व्यञ्जनं गामश्वमभ्यञ्जनम् ।

8.078.02c सचा मना हिरण्यया ॥

8.078.03a उत नः कर्णशोभना पुरूणि धृष्णवा भर ।

8.078.03c त्वं हि शृण्विषे वसो ॥

8.078.04a नकीं वृधीक इन्द्र ते न सुषा न सुदा उत ।

8.078.04c नान्यस्त्वच्छूर वाघतः ॥

8.078.05a नकीमिन्द्रो निकर्तवे न शक्रः परिशक्तवे ।

8.078.05c विश्वं शृणोति पश्यति ॥

8.078.06a स मन्युं मर्त्यानामदब्धो नि चिकीषते ।

8.078.06c पुरा निदश्चिकीषते ॥

8.078.07a क्रत्व इत्पूर्णमुदरं तुरस्यास्ति विधतः ।

8.078.07c वृत्रघ्नः सोमपाव्नः ॥

8.078.08a त्वे वसूनि संगता विश्वा च सोम सौभगा ।

8.078.08c सुदात्वपरिह्वृता ॥

8.078.09a त्वामिद्यवयुर्मम कामो गव्युर्हिरण्ययुः ।

8.078.09c त्वामश्वयुरेषते ॥

8.078.10a तवेदिन्द्राहमाशसा हस्ते दात्रं चना ददे ।

8.078.10c दिनस्य वा मघवन्सम्भृतस्य वा पूर्धि यवस्य काशिना ॥

8.079.01a अयं कृत्नुरगृभीतो विश्वजिदुद्भिदित्सोमः ।

8.079.01c ऋषिर्विप्रः काव्येन ॥

8.079.02a अभ्यूर्णोति यन्नग्नं भिषक्ति विश्वं यत्तुरम् ।

8.079.02c प्रेमन्धः ख्यन्निः श्रोणो भूत् ॥

8.079.03a त्वं सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्यः ।

8.079.03c उरु यन्तासि वरूथम् ॥

8.079.04a त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन् ।

8.079.04c यावीरघस्य चिद्द्वेषः ॥

8.079.05a अर्थिनो यन्ति चेदर्थं गच्छानिद्ददुषो रातिम् ।

8.079.05c ववृज्युस्तृष्यतः कामम् ॥

8.079.06a विदद्यत्पूर्व्यं नष्टमुदीमृतायुमीरयत् ।

8.079.06c प्रेमायुस्तारीदतीर्णम् ॥

8.079.07a सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः ।

8.079.07c भवा नः सोम शं हृदे ॥

8.079.08a मा नः सोम सं वीविजो मा वि बीभिषथा राजन् ।

8.079.08c मा नो हार्दि त्विषा वधीः ॥

8.079.09a अव यत्स्वे सधस्थे देवानां दुर्मतीरीक्षे ।

8.079.09c राजन्नप द्विषः सेध मीढ्वो अप स्त्रिधः सेध ॥

8.080.01a नह्यन्यं बळाकरं मर्डितारं शतक्रतो ।
8.080.01c त्वं न इन्द्र मृळय ॥
8.080.02a यो नः शश्वत्पुराविथामृध्रो वाजसातये ।
8.080.02c स त्वं न इन्द्र मृळय ॥
8.080.03a किमङ्ग रध्रचोदनः सुन्वानस्यावितेदसि ।
8.080.03c कुवित्स्विन्द्र णः शकः ॥
8.080.04a इन्द्र प्र णो रथमव पश्चाच्चित्सन्तमद्रिवः ।
8.080.04c पुरस्तादेनं मे कृधि ॥
8.080.05a हन्तो नु किमाससे प्रथमं नो रथं कृधि ।
8.080.05c उपमं वाजयु श्रवः ॥
8.080.06a अवा नो वाजयुं रथं सुकरं ते किमित्परि ।
8.080.06c अस्मान्सु जिग्युषस्कृधि ॥
8.080.07a इन्द्र दृह्यस्व पूरसि भद्रा त एति निष्कृतम् ।
8.080.07c इयं धीर्ऋत्वियावती ॥
8.080.08a मा सीमवद्य आ भागुर्वी काष्ठा हितं धनम् ।
8.080.08c अपावृक्ता अरत्नयः ॥

8.080.09a तुरीयं नाम यज्ञियं यदा करस्तदुश्मसि ।

8.080.09c आदित्पतिर्न ओहसे ॥

8.080.10a अवीवृधद्वो अमृता अमन्दीदेकद्यूर्देवा उत याश्च देवीः ।

8.080.10c तस्मा उ राधः कृणुत प्रशस्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥

8.081.01a आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय ।

8.081.01c महाहस्ती दक्षिणेन ॥

8.081.02a विद्मा हि त्वा तुविकूर्मिं तुविदेष्णं तुवीमघम् ।

8.081.02c तुविमात्रमवोभिः ॥

8.081.03a नहि त्वा शूर देवा न मर्तासो दित्सन्तम् ।

8.081.03c भीमं न गां वारयन्ते ॥

8.081.04a एतो न्विन्द्रं स्तवामेशानं वस्वः स्वराजम् ।

8.081.04c न राधसा मर्धिषन्नः ॥

8.081.05a प्र स्तोषदुप गासिषच्छ्रवत्साम गीयमानम् ।

8.081.05c अभि राधसा जुगुरत् ॥

8.081.06a आ नो भर दक्षिणेनाभि सव्येन प्र मृश ।

8.081.06c इन्द्र मा नो वसोर्निर्भाक् ॥

8.081.07a उप क्रमस्वा भर धृषता धृष्णो जनानाम् ।

8.081.07c अदाशूष्टरस्य वेदः ॥

8.081.08a इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः ।

8.081.08c अस्माभिः सु तं सनुहि ॥

8.081.09a सद्योजुवस्ते वाजा अस्मभ्यं विश्वश्चन्द्राः ।

8.081.09c वशैश्च मक्षू जरन्ते ॥

8.082.01a आ प्र द्रव परावतोऽर्वावतश्च वृत्रहन् ।

8.082.01c मध्वः प्रति प्रभर्मणि ॥

8.082.02a तीव्राः सोमास आ गहि सुतासो मादयिष्णवः ।

8.082.02c पिबा दधृग्यथोचिषे ॥

8.082.03a इषा मन्दस्वादु तेऽरं वराय मन्यवे ।

8.082.03c भुवत्त इन्द्र शं हृदे ॥

8.082.04a आ त्वशत्रवा गहि न्युक्थानि च हूयसे ।

8.082.04c उपमे रोचने दिवः ॥

8.082.05a तुभ्यायमद्रिभिः सुतो गोभिः श्रीतो मदाय कम् ।

8.082.05c प्र सोम इन्द्र हूयते ॥

8.082.06a इन्द्र श्रुधि सु मे हवमस्मे सुतस्य गोमतः ।

8.082.06c वि पीतिं तृप्तिमश्नुहि ॥

8.082.07a य इन्द्र चमसेष्वा सोमश्चमूषु ते सुतः ।
8.082.07c पिबेदस्य त्वमीशिषे ॥
8.082.08a यो अप्सु चन्द्रमा इव सोमश्चमूषु ददृशे ।
8.082.08c पिबेदस्य त्वमीशिषे ॥
8.082.09a यं ते श्येनः पदाभरत्तिरो रजांस्यस्पृतम् ।
8.082.09c पिबेदस्य त्वमीशिषे ॥

8.083.01a देवानामिदवो महत्तदा वृणीमहे वयम् ।
8.083.01c वृष्णामस्मभ्यमूतये ॥
8.083.02a ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा ।
8.083.02c वृधासश्च प्रचेतसः ॥
8.083.03a अति नो विष्पिता पुरु नौभिरपो न पर्षथ ।
8.083.03c यूयमृतस्य रथ्यः ॥
8.083.04a वामं नो अस्त्वर्यमन्वामं वरुण शंस्यम् ।
8.083.04c वामं ह्यावृणीमहे ॥
8.083.05a वामस्य हि प्रचेतस ईशानाशो रिशादसः ।
8.083.05c नेमादित्या अघस्य यत् ॥
8.083.06a वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना ।

8.083.06c देवा वृधाय हूमहे ॥

8.083.07a अधि न इन्द्रैषां विष्णो सजात्यानाम् ।

8.083.07c इता मरुतो अश्विना ॥

8.083.08a प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या ।

8.083.08c मातुर्गर्भे भरामहे ॥

8.083.09a यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः ।

8.083.09c अधा चिद्व उत ब्रुवे ॥

8.084.01a प्रेष्ठं वो अतिथिं स्तुषे मित्रमिव प्रियम् ।

8.084.01c अग्निं रथं न वेद्यम् ॥

8.084.02a कविमिव प्रचेतसं यं देवासो अध द्विता ।

8.084.02c नि मर्त्येष्वादधुः ॥

8.084.03a त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः ।

8.084.03c रक्षा तोकमुत त्मना ॥

8.084.04a कया ते अग्ने अङ्गिर ऊर्जो नपादुपस्तुतिम् ।

8.084.04c वराय देव मन्यवे ॥

8.084.05a दाशेम कस्य मनसा यज्ञस्य सहसो यहो ।

8.084.05c कदु वोच इदं नमः ॥

8.084.06a अधा त्वं हि नस्करो विश्वा अस्मभ्यं सुक्षितीः ।

8.084.06c वाजद्रविणसो गिरः ॥

8.084.07a कस्य नूनं परीणसो धियो जिन्वसि दम्पते ।

8.084.07c गोषाता यस्य ते गिरः ॥

8.084.08a तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु ।

8.084.08c स्वेषु क्षयेषु वाजिनम् ॥

8.084.09a क्षेति क्षेमेभिः साधुभिर्नकिर्यं घ्नन्ति हन्ति यः ।

8.084.09c अग्ने सुवीर एधते ॥

8.085.01a आ मे हवं नासत्याश्विना गच्छतं युवम् ।

8.085.01c मध्वः सोमस्य पीतये ॥

8.085.02a इमं मे स्तोममश्विनेमं मे शृणुतं हवम् ।

8.085.02c मध्वः सोमस्य पीतये ॥

8.085.03a अयं वां कृष्णो अश्विना हवते वाजिनीवसू ।

8.085.03c मध्वः सोमस्य पीतये ॥

8.085.04a शृणुतं जरितुर्हवं कृष्णस्य स्तुवतो नरा ।

8.085.04c मध्वः सोमस्य पीतये ॥

8.085.05a छर्दिर्यन्तमदाभ्यं विप्राय स्तुवते नरा ।

8.085.05c मध्वः सोमस्य पीतये ॥

8.085.06a गच्छतं दाशुषो गृहमित्था स्तुवतो अश्विना ।

8.085.06c मध्वः सोमस्य पीतये ॥

8.085.07a युञ्जाथां रासभं रथे वीड्वङ्गे वृषण्वसू ।

8.085.07c मध्वः सोमस्य पीतये ॥

8.085.08a त्रिवन्धुरेण त्रिवृता रथेना यातमश्विना ।

8.085.08c मध्वः सोमस्य पीतये ॥

8.085.09a नू मे गिरो नासत्याश्विना प्रावतं युवम् ।

8.085.09c मध्वः सोमस्य पीतये ॥

8.086.01a उभा हि दस्रा भिषजा मयोभुवोभा दक्षस्य वचसो बभूवथुः ।

8.086.01c ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥

8.086.02a कथा नूनं वां विमना उप स्तवद्युवं धियं ददथुर्वस्यइष्टये ।

8.086.02c ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥

8.086.03a युवं हि ष्मा पुरुभुजेममेधतुं विष्णाप्वे ददथुर्वस्यइष्टये ।

8.086.03c ता वां विश्वको हवते तनूकृथे मा नो वि यौष्टं सख्या मुमोचतम् ॥

8.086.04a उत त्यं वीरं धनसामृजीषिणं दूरे चित्सन्तमवसे हवामहे ।

8.086.04c यस्य स्वादिष्ठा सुमतिः पितुर्यथा मा नो वि यौष्टं सख्या मुमोचतम् ॥

8.086.05a ऋतेन देवः सविता शमायत ऋतस्य शृङ्गमुर्विया वि पप्रथे ।

8.086.05c ऋतं सासाह महि चित्पृतन्यतो मा नो वि यौष्टं सख्या मुमोचतम् ॥

8.087.01a द्युम्नी वां स्तोमो अश्विना क्रिविर्न सेक आ गतम् ।

8.087.01c मध्वः सुतस्य स दिवि प्रियो नरा पातं गौराविवेरिणे ॥

8.087.02a पिबतं घर्मं मधुमन्तमश्विना बर्हिः सीदतं नरा ।

8.087.02c ता मन्दसाना मनुषो दुरोण आ नि पातं वेदसा वयः ॥

8.087.03a आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।

8.087.03c ता वर्तिर्यातमुप वृक्तबर्हिषो जुष्टं यज्ञं दिविष्टिषु ॥

8.087.04a पिबतं सोमं मधुमन्तमश्विना बर्हिः सीदतं सुमत् ।

8.087.04c ता वावृधाना उप सुष्टुतिं दिवो गन्तं गौराविवेरिणम् ॥

8.087.05a आ नूनं यातमश्विनाश्वेभिः प्रुषितप्सुभिः ।

8.087.05c दस्रा हिरण्यवर्तनी शुभस्पती पातं सोममृतावृधा ॥

8.087.06a वयं हि वां हवामहे विपन्यवो विप्रासो वाजसातये ।

8.087.06c ता वल्गू दस्रा पुरुदंससा धियाश्विना श्रुष्ट्या गतम् ॥

8.088.01a तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।

8.088.01c अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥

8.088.02a द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।

8.088.02c क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥

8.088.03a न त्वा बृहन्तो अद्रयो वरन्त इन्द्र वीळवः ।

8.088.03c यद्दित्ससि स्तुवते मावते वसु नकिष्टदा मिनाति ते ॥

8.088.04a योद्धासि क्रत्वा शवसोत दंसना विश्वा जाताभि मज्मना ।

8.088.04c आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन् ॥

8.088.05a प्र हि रिरिक्ष ओजसा दिवो अन्तेभ्यस्परि ।

8.088.05c न त्वा विव्याच रज इन्द्र पार्थिवमनु स्वधां ववक्षिथ ॥

8.088.06a नकिः परिष्टिर्मघवन्मघस्य ते यद्दाशुषे दशस्यसि ।

8.088.06c अस्माकं बोध्युचथस्य चोदिता मंहिष्ठो वाजसातये ॥

8.089.01a बृहदिन्द्राय गायत मरुतो वृत्रहन्तमम् ।

8.089.01c येन ज्योतिरजनयन्नृतावृधो देवं देवाय जागृवि ॥

8.089.02a अपाधमदभिशस्तीरशस्तिहाथेन्द्रो द्युम्न्याभवत् ।

8.089.02c देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ॥

8.089.03a प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत ।

8.089.03c वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा ॥

8.089.04a अभि प्र भर धृषता धृषन्मनः श्रवश्चित्ते असद्बृहत् ।

8.089.04c अर्षन्त्वापो जवसा वि मातरो हनो वृत्रं जया स्वः ॥

8.089.05a यज्जायथा अपूर्व्य मघवन्वृत्रहत्याय ।

8.089.05c तत्पृथिवीमप्रथयस्तदस्तभ्ना उत द्याम् ॥

8.089.06a तत्ते यज्ञो अजायत तदर्क उत हस्कृतिः ।

8.089.06c तद्विश्वमभिभूरसि यज्जातं यच्च जन्त्वम् ॥

8.089.07a आमासु पक्वमैरय आ सूर्यं रोहयो दिवि ।

8.089.07c घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत् ॥

8.090.01a आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु ।

8.090.01c उप ब्रह्माणि सवनानि वृत्रहा परमज्या ऋचीषमः ॥

8.090.02a त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।

8.090.02c तुविद्युम्नस्य युज्या वृणीमहे पुत्रस्य शवसो महः ॥

8.090.03a ब्रह्मा त इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता ।

8.090.03c इमा जुषस्व हर्यश्व योजनेन्द्र या ते अमन्महि ॥

8.090.04a त्वं हि सत्यो मघवन्ननानतो वृत्रा भूरि न्यृञ्जसे ।

8.090.04c स त्वं शविष्ठ वज्रहस्त दाशुषेऽर्वाञ्चं रयिमा कृधि ॥

8.090.05a त्वमिन्द्र यशा अस्यृजीषी शवसस्पते ।

8.090.05c त्वं वृत्राणि हंस्यप्रतीन्येक इदनुत्ता चर्षणीधृता ॥

8.090.06a तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे ।

8.090.06c महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन् ॥

8.091.01a कन्या३ वारवायती सोममपि स्रुताविदत् ।

8.091.01c अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥

8.091.02a असौ य एषि वीरको गृहंगृहं विचाकशद् ।

8.091.02c इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥

8.091.03a आ चन त्वा चिकित्सामोऽधि चन त्वा नेमसि ।

8.091.03c शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव ॥

8.091.04a कुविच्छकत्कुवित्करत्कुविन्नो वस्यसस्करत् ।

8.091.04c कुवित्पतिद्विषो यतीरिन्द्रेण संगमामहै ॥

8.091.05a इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय ।

8.091.05c शिरस्ततस्योर्वरामादिदं म उपोदरे ॥

8.091.06a असौ च या न उर्वरादिमां तन्वं१ मम ।

8.091.06c अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि ॥

8.091.07a खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।

8.091.07c अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥

8.092.01a पान्तमा वो अन्धस इन्द्रमभि प्र गायत ।

8.092.01c विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् ॥

8.092.02a पुरुहूतं पुरुष्टुतं गाथान्यं१ सनश्रुतम् ।

8.092.02c इन्द्र इति ब्रवीतन ॥

8.092.03a इन्द्र इन्नो महानां दाता वाजानां नृतुः ।

8.092.03c महाँ अभिज्ञ्वा यमत् ॥

8.092.04a अपादु शिप्र्यन्धसः सुदक्षस्य प्रहोषिणः ।

8.092.04c इन्दोरिन्द्रो यवाशिरः ॥

8.092.05a तम्वभि प्रार्चतेन्द्रं सोमस्य पीतये ।

8.092.05c तदिद्ध्यस्य वर्धनम् ॥

8.092.06a अस्य पीत्वा मदानां देवो देवस्यौजसा ।

8.092.06c विश्वाभि भुवना भुवत् ॥

8.092.07a त्यमु वः सत्रासाहं विश्वासु गीर्ष्वायतम् ।

8.092.07c आ च्यावयस्यूतये ॥

8.092.08a युध्मं सन्तमनर्वाणं सोमपामनपच्युतम् ।

8.092.08c नरमवार्यक्रतुम् ॥

8.092.09a शिक्षा ण इन्द्र राय आ पुरु विद्वाँ ऋचीषम ।

8.092.09c अवा नः पार्ये धने ॥

8.092.10a अतश्चिदिन्द्र ण उपा याहि शतवाजया ।
8.092.10c इषा सहस्रवाजया ॥
8.092.11a अयाम धीवतो धियोऽर्वद्भिः शक्र गोदरे ।
8.092.11c जयेम पृत्सु वज्रिवः ॥
8.092.12a वयमु त्वा शतक्रतो गावो न यवसेष्वा ।
8.092.12c उक्थेषु रणयामसि ॥
8.092.13a विश्वा हि मर्त्यत्वनानुकामा शतक्रतो ।
8.092.13c अगन्म वज्रिन्नाशसः ॥
8.092.14a त्वे सु पुत्र शवसोऽवृत्रन्कामकातयः ।
8.092.14c न त्वामिन्द्राति रिच्यते ॥
8.092.15a स नो वृषन्सनिष्ठया सं घोरया द्रवित्न्वा ।
8.092.15c धियाविड्ढि पुरंध्या ॥
8.092.16a यस्ते नूनं शतक्रतविन्द्र द्युम्नितमो मदः ।
8.092.16c तेन नूनं मदे मदेः ॥
8.092.17a यस्ते चित्रश्रवस्तमो य इन्द्र वृत्रहन्तमः ।
8.092.17c य ओजोदातमो मदः ॥
8.092.18a विद्मा हि यस्ते अद्रिवस्त्वादत्तः सत्य सोमपाः ।
8.092.18c विश्वासु दस्म कृष्टिषु ॥

8.092.19a इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।

8.092.19c अर्कमर्चन्तु कारवः ॥

8.092.20a यस्मिन्विश्वा अधि श्रियो रणन्ति सप्त संसदः ।

8.092.20c इन्द्रं सुते हवामहे ॥

8.092.21a त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।

8.092.21c तमिद्वर्धन्तु नो गिरः ॥

8.092.22a आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः ।

8.092.22c न त्वामिन्द्राति रिच्यते ॥

8.092.23a विव्यक्थ महिना वृषन्भक्षं सोमस्य जागृवे ।

8.092.23c य इन्द्र जठरेषु ते ॥

8.092.24a अरं त इन्द्र कुक्षये सोमो भवतु वृत्रहन् ।

8.092.24c अरं धामभ्य इन्दवः ॥

8.092.25a अरमश्वाय गायति श्रुतकक्षो अरं गवे ।

8.092.25c अरमिन्द्रस्य धाम्ने ॥

8.092.26a अरं हि ष्म सुतेषु णः सोमेष्विन्द्र भूषसि ।

8.092.26c अरं ते शक्र दावने ॥

8.092.27a पराकात्ताच्चिदद्रिवस्त्वां नक्षन्त नो गिरः ।

8.092.27c अरं गमाम ते वयम् ॥

8.092.28a एवा ह्यसि वीरयुरेवा शूर उत स्थिरः ।

8.092.28c एवा ते राध्यं मनः ॥

8.092.29a एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः ।

8.092.29c अधा चिदिन्द्र मे सचा ॥

8.092.30a मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते ।

8.092.30c मत्स्वा सुतस्य गोमतः ॥

8.092.31a मा न इन्द्राभ्या३दिशः सूरो अक्तुष्वा यमन् ।

8.092.31c त्वा युजा वनेम तत् ॥

8.092.32a त्वयेदिन्द्र युजा वयं प्रति ब्रुवीमहि स्पृधः ।

8.092.32c त्वमस्माकं तव स्मसि ॥

8.092.33a त्वामिद्धि त्वायवोऽनुनोनुवतश्चरान् ।

8.092.33c सखाय इन्द्र कारवः ॥

8.093.01a उद्घेदभि श्रुतामघं वृषभं नर्यापसम् ।

8.093.01c अस्तारमेषि सूर्य ॥

8.093.02a नव यो नवतिं पुरो बिभेद बाह्वोजसा ।

8.093.02c अहिं च वृत्रहावधीत् ॥

8.093.03a स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत् ।

8.093.03c उरुधारेव दोहते ॥

8.093.04a यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।

8.093.04c सर्वं तदिन्द्र ते वशे ॥

8.093.05a यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे ।

8.093.05c उतो तत्सत्यमित्तव ॥

8.093.06a ये सोमासः परावति ये अर्वावति सुन्विरे ।

8.093.06c सर्वाँस्ताँ इन्द्र गच्छसि ॥

8.093.07a तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।

8.093.07c स वृषा वृषभो भुवत् ॥

8.093.08a इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः ।

8.093.08c द्युम्नी श्लोकी स सोम्यः ॥

8.093.09a गिरा वज्रो न सम्भृतः सबलो अनपच्युतः ।

8.093.09c ववक्ष ऋष्वो अस्तृतः ॥

8.093.10a दुर्गे चिन्नः सुगं कृधि गृणान इन्द्र गिर्वणः ।

8.093.10c त्वं च मघवन्वशः ॥

8.093.11a यस्य ते नू चिदादिशं न मिनन्ति स्वराज्यम् ।

8.093.11c न देवो नाध्रिगुर्जनः ॥

8.093.12a अधा ते अप्रतिष्कुतं देवी शुष्मं सपर्यतः ।

8.093.12c उभे सुशिप्र रोदसी ॥

8.093.13a त्वमेतदधारयः कृष्णासु रोहिणीषु च ।

8.093.13c परुष्णीषु रुशत्पयः ॥

8.093.14a वि यदहेरध त्विषो विश्वे देवासो अक्रमुः ।

8.093.14c विदन्मृगस्य ताँ अमः ॥

8.093.15a आदु मे निवरो भुवद्वृत्रहादिष्ट पौंस्यम् ।

8.093.15c अजातशत्रुरस्तृतः ॥

8.093.16a श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम् ।

8.093.16c आ शुषे राधसे महे ॥

8.093.17a अया धिया च गव्यया पुरुणामन्पुरुष्टुत ।

8.093.17c यत्सोमेसोम आभवः ॥

8.093.18a बोधिन्मना इदस्तु नो वृत्रहा भूर्यासुतिः ।

8.093.18c शृणोतु शक्र आशिषम् ॥

8.093.19a कया त्वं न ऊत्याभि प्र मन्दसे वृषन् ।

8.093.19c कया स्तोतृभ्य आ भर ॥

8.093.20a कस्य वृषा सुते सचा नियुत्वान्वृषभो रणत् ।

8.093.20c वृत्रहा सोमपीतये ॥

8.093.21a अभी षु णस्त्वं रयिं मन्दसानः सहस्रिणम् ।

8.093.21c प्रयन्ता बोधि दाशुषे ॥

8.093.22a पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये ।

8.093.22c अपां जग्मिर्निचुम्पुणः ॥

8.093.23a इष्टा होत्रा असृक्षतेन्द्रं वृधासो अध्वरे ।

8.093.23c अच्छावभृथमोजसा ॥

8.093.24a इह त्या सधमाद्या हरी हिरण्यकेश्या ।

8.093.24c वोळ्हामभि प्रयो हितम् ॥

8.093.25a तुभ्यं सोमाः सुता इमे स्तीर्णं बर्हिर्विभावसो ।

8.093.25c स्तोतृभ्य इन्द्रमा वह ॥

8.093.26a आ ते दक्षं वि रोचना दधद्रत्ना वि दाशुषे ।

8.093.26c स्तोतृभ्य इन्द्रमर्चत ॥

8.093.27a आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो ।

8.093.27c स्तोतृभ्य इन्द्र मृळय ॥

8.093.28a भद्रम्भद्रं न आ भरेषमूर्जं शतक्रतो ।

8.093.28c यदिन्द्र मृळयासि नः ॥

8.093.29a स नो विश्वान्या भर सुवितानि शतक्रतो ।

8.093.29c यदिन्द्र मृळयासि नः ॥

8.093.30a त्वामिद्वृत्रहन्तम सुतावन्तो हवामहे ।

8.093.30c यदि॑न्द्र मृ॒ळया॑सि नः ॥

8.093.31a उप॑ नो॒ हरि॑भिः सु॒तं या॒हि म॑दानां पते ।

8.093.31c उप॑ नो॒ हरि॑भिः सु॒तम् ॥

8.093.32a द्वि॒ता यो वृ॑त्र॒हन्त॑मो वि॒द इन्द्रः॑ श॒तक्र॑तुः ।

8.093.32c उप॑ नो॒ हरि॑भिः सु॒तम् ॥

8.093.33a त्वं हि वृ॑त्रहन्नेषां पा॒ता सोमा॑ना॒मसि॑ ।

8.093.33c उप॑ नो॒ हरि॑भिः सु॒तम् ॥

8.093.34a इन्द्र॑ इ॒षे द॑दातु न ऋभु॒क्षण॑मृ॒भुं र॒यिम् ।

8.093.34c वा॒जी द॑दातु वा॒जिन॑म् ॥

8.094.01a गौर्ध॑यति म॒रुतां॑ श्रव॒स्युर्मा॒ता म॒घोना॑म् ।

8.094.01c यु॒क्ता व॒ह्नी रथा॑नाम् ॥

8.094.02a यस्या॑ दे॒वा उ॒पस्थे॑ व्र॒ता विश्वे॑ धा॒रय॑न्ते ।

8.094.02c सूर्या॒मासा॑ दृ॒शे कम् ॥

8.094.03a तत्सु नो॒ विश्वे॑ अ॒र्य आ सदा॑ गृणन्ति का॒रवः॑ ।

8.094.03c म॒रु॒तः सोम॑पीतये ॥

8.094.04a अस्ति॒ सोमो॑ अ॒यं सु॒तः पिब॑न्त्यस्य म॒रुतः॑ ।

8.094.04c उ॒त स्व॒राजो॑ अ॒श्विना॑ ॥

8.094.05a पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः ।

8.094.05c त्रिषधस्थस्य जावतः ॥

8.094.06a उतो न्वस्य जोषमाँ इन्द्रः सुतस्य गोमतः ।

8.094.06c प्रातर्होतेव मत्सति ॥

8.094.07a कदत्विषन्त सूरयस्तिर आप इव स्रिधः ।

8.094.07c अर्षन्ति पूतदक्षसः ॥

8.094.08a कद्वो अद्य महानां देवानामवो वृणे ।

8.094.08c त्मना च दस्मवर्चसाम् ॥

8.094.09a आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः ।

8.094.09c मरुतः सोमपीतये ॥

8.094.10a त्यान्नु पूतदक्षसो दिवो वो मरुतो हुवे ।

8.094.10c अस्य सोमस्य पीतये ॥

8.094.11a त्यान्नु ये वि रोदसी तस्तभुर्मरुतो हुवे ।

8.094.11c अस्य सोमस्य पीतये ॥

8.094.12a त्यं नु मारुतं गणं गिरिष्ठां वृषणं हुवे ।

8.094.12c अस्य सोमस्य पीतये ॥

8.095.01a आ त्वा गिरो रथीरिवास्थुः सुतेषु गिर्वणः ।

8.095.01c अभि त्वा समनूषतेन्द्र वत्सं न मातरः ॥

8.095.02a आ त्वा शुक्रा अचुच्यवुः सुतास इन्द्र गिर्वणः ।

8.095.02c पिबा त्वश्स्यान्धस इन्द्र विश्वासु ते हितम् ॥

8.095.03a पिबा सोमं मदाय कमिन्द्र श्येनाभृतं सुतम् ।

8.095.03c त्वं हि शश्वतीनां पती राजा विशामसि ॥

8.095.04a श्रुधी हवं तिरश्च्या इन्द्र यस्त्वा सपर्यति ।

8.095.04c सुवीर्यस्य गोमतो रायस्पूर्धि महाँ असि ॥

8.095.05a इन्द्र यस्ते नवीयसीं गिरं मन्द्रामजीजनत् ।

8.095.05c चिकित्विन्मनसं धियं प्रत्नामृतस्य पिप्युषीम् ॥

8.095.06a तमु ष्टवाम यं गिर इन्द्रमुक्थानि वावृधुः ।

8.095.06c पुरूण्यस्य पौंस्या सिषासन्तो वनामहे ॥

8.095.07a एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना ।

8.095.07c शुद्धैरुक्थैर्वावृध्वांसं शुद्ध आशीर्वान्ममत्तु ॥

8.095.08a इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः ।

8.095.08c शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्यः ॥

8.095.09a इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे ।

8.095.09c शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि ॥

8.096.01a अस्मा उषास आतिरन्त याममिन्द्राय नक्तमूर्म्याः सुवाचः ।

8.096.01c अस्मा आपो मातरः सप्त तस्थुर्नृभ्यस्तराय सिन्धवः सुपाराः ॥

8.096.02a अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम् ।

8.096.02c न तद्देवो न मर्त्यस्तुतुर्याद्यानि प्रवृद्धो वृषभश्चकार ॥

8.096.03a इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः ।

8.096.03c शीर्षन्निन्द्रस्य क्रतवो निरेक आसन्नेषन्त श्रुत्या उपाके ॥

8.096.04a मन्ये त्वा यज्ञियं यज्ञियानां मन्ये त्वा च्यवनमच्युतानाम् ।

8.096.04c मन्ये त्वा सत्वनामिन्द्र केतुं मन्ये त्वा वृषभं चर्षणीनाम् ॥

8.096.05a आ यद्वज्रं बाह्वोरिन्द्र धत्से मदच्युतमहये हन्तवा उ ।

8.096.05c प्र पर्वता अनवन्त प्र गावः प्र ब्रह्माणो अभिनक्षन्त इन्द्रम् ॥

8.096.06a तमु ष्टवाम य इमा जजान विश्वा जातान्यवराण्यस्मात् ।

8.096.06c इन्द्रेण मित्रं दिधिषेम गीर्भिरुपो नमोभिर्वृषभं विशेम ॥

8.096.07a वृत्रस्य त्वा श्वसथादीषमाणा विश्वे देवा अजहुर्ये सखायः ।

8.096.07c मरुद्भिरिन्द्र सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि ॥

8.096.08a त्रिः षष्टिस्त्वा मरुतो वावृधाना उस्रा इव राशयो यज्ञियासः ।

8.096.08c उप त्वेमः कृधि नो भागधेयं शुष्मं त एना हविषा विधेम ॥

8.096.09a तिग्ममायुधं मरुतामनीकं कस्त इन्द्र प्रति वज्रं दधर्ष ।

8.096.09c अनायुधासो असुरा अदेवाश्चक्रेण ताँ अप वप ऋजीषिन् ॥

8.096.10a महं उग्राय तवसे सुवृक्तिं प्रेरय शिवतमाय पश्वः ।
8.096.10c गिर्वाहसे गिर इन्द्राय पूर्वीर्धेहि तन्वे कुविदङ्ग वेदत् ॥
8.096.11a उक्थवाहसे विभ्वे मनीषां द्रुणा न पारमीरया नदीनाम् ।
8.096.11c नि स्पृश धिया तन्वि श्रुतस्य जुष्टतरस्य कुविदङ्ग वेदत् ॥
8.096.12a तद्विविड्ढि यत्त इन्द्रो जुजोषत्स्तुहि सुष्टुतिं नमसा विवास ।
8.096.12c उप भूष जरितर्मा रुवण्यः श्रावया वाचं कुविदङ्ग वेदत् ॥
8.096.13a अव द्रप्सो अंशुमतीमतिष्ठदियानः कृष्णो दशभिः सहस्रैः ।
8.096.13c आवत्तमिन्द्रः शच्या धमन्तमप स्नेहितीर्नृमणा अधत्त ॥
8.096.14a द्रप्समपश्यं विषुणे चरन्तमुपह्वरे नद्यो अंशुमत्याः ।
8.096.14c नभो न कृष्णमवतस्थिवांसमिष्यामि वो वृषणो युध्यताजौ ॥
8.096.15a अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्तन्वं तित्विषाणः ।
8.096.15c विशो अदेवीरभ्याचरन्तीर्बृहस्पतिना युजेन्द्रः ससाहे ॥
8.096.16a त्वं ह त्यत्सप्तभ्यो जायमानोऽशत्रुभ्यो अभवः शत्रुरिन्द्र ।
8.096.16c गूळ्हे द्यावापृथिवी अन्वविन्दो विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥
8.096.17a त्वं ह त्यदप्रतिमानमोजो वज्रेण वज्रिन्धृषितो जघन्थ ।
8.096.17c त्वं शुष्णस्यावातिरो वधत्रैस्त्वं गा इन्द्र शच्येदविन्दः ॥
8.096.18a त्वं ह त्यद्वृषभ चर्षणीनां घनो वृत्राणां तविषो बभूथ ।
8.096.18c त्वं सिन्धूँरसृजस्तस्तभानान्त्वमपो अजयो दासपत्नीः ॥

8.096.19a स सुक्रतू रणिता यः सुतेष्वनुत्तमन्युर्यो अहेव रेवान् ।

8.096.19c य एक इन्नर्यपांसि कर्ता स वृत्रहा प्रतीदन्यमाहुः ॥

8.096.20a स वृत्रहेन्द्रश्चर्षणीधृत्तं सुष्टुत्या हव्यं हुवेम ।

8.096.20c स प्राविता मघवा नोऽधिवक्ता स वाजस्य श्रवस्यस्य दाता ॥

8.096.21a स वृत्रहेन्द्र ऋभुक्षाः सद्यो जज्ञानो हव्यो बभूव ।

8.096.21c कृण्वन्नपांसि नर्या पुरूणि सोमो न पीतो हव्यः सखिभ्यः ॥

8.097.01a या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।

8.097.01c स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥

8.097.02a यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम् ।

8.097.02c यजमाने सुन्वति दक्षिणावति तस्मिन्तं धेहि मा पणौ ॥

8.097.03a य इन्द्र सस्त्यव्रतोऽनुष्वापमदेवयुः ।

8.097.03c स्वैः ष एवैर्मुमुरत्पोष्यं रयिं सनुतर्धेहि तं ततः ॥

8.097.04a यच्छक्रासि परावति यदर्वावति वृत्रहन् ।

8.097.04c अतस्त्वा गीर्भिर्द्युगदिन्द्र केशिभिः सुतावाँ आ विवासति ॥

8.097.05a यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि ।

8.097.05c यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि ॥

8.097.06a स नः सोमेषु सोमपाः सुतेषु शवसस्पते ।

8.097.06c मादयस्व राधसा सूनृतावतेन्द्र राया परीणसा ॥

8.097.07a मा न इन्द्र परा वृणग्भवा नः सधमाद्यः ।

8.097.07c त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक् ॥

8.097.08a अस्मे इन्द्र सचा सुते नि षदा पीतये मधु ।

8.097.08c कृधी जरित्रे मघवन्नवो महदस्मे इन्द्र सचा सुते ॥

8.097.09a न त्वा देवास आशत न मर्त्यासो अद्रिवः ।

8.097.09c विश्वा जातानि शवसाभिभूरसि न त्वा देवास आशत ॥

8.097.10a विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।

8.097.10c क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम् ॥

8.097.11a समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।

8.097.11c स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥

8.097.12a नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।

8.097.12c सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥

8.097.13a तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं शवांसि ।

8.097.13c मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्राये नो विश्वा सुपथा कृणोतु वज्री ॥

8.097.14a त्वं पुर इन्द्र चिकिदेना व्योजसा शविष्ठ शक्र नाशयध्यै ।

8.097.14c त्वद्विश्वानि भुवनानि वज्रिन्द्यावा रेजेते पृथिवी च भीषा ॥

8.097.15a तन्म ऋतमिन्द्र शूर चित्र पात्वपो न वज्रिन्दुरिताति पर्षि भूरि ।

8.097.15c कदा न इन्द्र राय आ दशस्येर्विश्वप्स्न्यस्य स्पृहयाय्यस्य राजन् ॥

8.098.01a इन्द्राय साम गायत विप्राय बृहते बृहत् ।

8.098.01c धर्मकृते विपश्चिते पनस्यवे ॥

8.098.02a त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः ।

8.098.02c विश्वकर्मा विश्वदेवो महाँ असि ॥

8.098.03a विभ्राजञ्ज्योतिषा स्व१रगच्छो रोचनं दिवः ।

8.098.03c देवास्त इन्द्र सख्याय येमिरे ॥

8.098.04a एन्द्र नो गधि प्रियः सत्राजिदगोह्यः ।

8.098.04c गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥

8.098.05a अभि हि सत्य सोमपा उभे बभूथ रोदसी ।

8.098.05c इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥

8.098.06a त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि ।

8.098.06c हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥

8.098.07a अधा हीन्द्र गिर्वण उप त्वा कामान्महः ससृज्महे ।

8.098.07c उदेव यन्त उदभिः ॥

8.098.08a वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि ।

8.098.08c वावृध्वांसं चिदद्रिवो दिवेदिवे ॥

8.098.09a युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे ।

8.098.09c इन्द्रवाहा वचोयुजा ॥

8.098.10a त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे ।

8.098.10c आ वीरं पृतनाषहम् ॥

8.098.11a त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ ।

8.098.11c अधा ते सुम्नमीमहे ॥

8.098.12a त्वां शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो ।

8.098.12c स नो रास्व सुवीर्यम् ॥

8.099.01a त्वामिदा ह्यो नरोऽपीप्यन्वज्रिन्भूर्णयः ।

8.099.01c स इन्द्र स्तोमवाहसामिह श्रुध्युप स्वसरमा गहि ॥

8.099.02a मत्स्वा सुशिप्र हरिवस्तदीमहे त्वे आ भूषन्ति वेधसः ।

8.099.02c तव श्रवांस्युपमान्युक्थ्या सुतेष्विन्द्र गिर्वणः ॥

8.099.03a श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।

8.099.03c वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥

8.099.04a अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।

8.099.04c सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन् ॥

8.099.05a त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।

8.099.05c अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥

8.099.06a अनु ते शुष्मं तुरयन्तमीयतुः क्षोणी शिशुं न मातरा ।

8.099.06c विश्वास्ते स्पृधः श्नथयन्त मन्यवे वृत्रं यदिन्द्र तूर्वसि ॥

8.099.07a इत ऊती वो अजरं प्रहेतारमप्रहितम् ।

8.099.07c आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥

8.099.08a इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् ।

8.099.08c समानमिन्द्रमवसे हवामहे वसवानं वसूजुवम् ॥

8.100.01a अयं त एमि तन्वा पुरस्ताद्विश्वे देवा अभि मा यन्ति पश्चात् ।

8.100.01c यदा मह्यं दीधरो भागमिन्द्रादिन्मया कृणवो वीर्याणि ॥

8.100.02a दधामि ते मधुनो भक्षमग्रे हितस्ते भागः सुतो अस्तु सोमः ।

8.100.02c असश्च त्वं दक्षिणतः सखा मेऽधा वृत्राणि जङ्घनाव भूरि ॥

8.100.03a प्र सु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ।

8.100.03c नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभि ष्टवाम ॥

8.100.04a अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि मह्ना ।

8.100.04c ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिरो भुवना दर्दरीमि ॥

8.100.05a आ यन्मा वेना अरुहन्नृतस्यँ एकमासीनं हर्यतस्य पृष्ठे ।

8.100.05c मनश्चिन्मे हृद आ प्रत्यवोचदचिक्रदञ्छिशुमन्तः सखायः ॥

8.100.06a विश्वेत्ता ते सवनेषु प्रवाच्या या चकर्थ मघवन्निन्द्र सुन्वते ।

8.100.06c पारावतं यत्पुरुसम्भृतं वस्वपावृणोः शरभाय ऋषिबन्धवे ॥

8.100.07a प्र नूनं धावता पृथङ्नेह यो वो अवावरीत् ।

8.100.07c नि षीं वृत्रस्य मर्मणि वज्रमिन्द्रो अपीपतत् ॥

8.100.08a मनोजवा अयमान आयसीमतरत्पुरम् ।

8.100.08c दिवं सुपर्णो गत्वाय सोमं वज्रिण आभरत् ॥

8.100.09a समुद्रे अन्तः शयत उद्ना वज्रो अभीवृतः ।

8.100.09c भरन्त्यस्मै संयतः पुरःप्रस्रवणा बलिम् ॥

8.100.10a यद्वाग्वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा ।

8.100.10c चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥

8.100.11a देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।

8.100.11c सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥

8.100.12a सखे विष्णो वितरं वि क्रमस्व द्यौर्देहि लोकं वज्राय विष्कभे ।

8.100.12c हनाव वृत्रं रिणचाव सिन्धूनिन्द्रस्य यन्तु प्रसवे विसृष्टाः ॥

8.101.01a ऋधगित्था स मर्त्यः शशमे देवतातये ।

8.101.01c यो नूनं मित्रावरुणावभिष्टय आचक्रे हव्यदातये ॥

8.101.02a वर्षिष्ठक्षत्रा उरुचक्षसा नरा राजाना दीर्घश्रुत्तमा ।

8.101.02c ता बाहुता न दंसना रथर्यतः साकं सूर्यस्य रश्मिभिः ॥

8.101.03a प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत् ।

8.101.03c अयःशीर्षा मदेरघुः ॥

8.101.04a न यः सम्पृच्छे न पुनर्हवीतवे न संवादाय रमते ।

8.101.04c तस्मान्नो अद्य समृतेरुरुष्यतं बाहुभ्यां न उरुष्यतम् ॥

8.101.05a प्र मित्राय प्रार्यम्णे सचथ्यमृतावसो ।

8.101.05c वरूथ्यं१ वरुणे छन्द्यं वच स्तोत्रं राजसु गायत ॥

8.101.06a ते हिन्विरे अरुणं जेन्यं वस्वेकं पुत्रं तिसृणाम् ।

8.101.06c ते धामान्यमृता मर्त्यानामदब्धा अभि चक्षते ॥

8.101.07a आ मे वचांस्युद्यता द्युमत्तमानि कर्त्वा ।

8.101.07c उभा यातं नासत्या सजोषसा प्रति हव्यानि वीतये ॥

8.101.08a रातिं यद्वामरक्षसं हवामहे युवाभ्यां वाजिनीवसू ।

8.101.08c प्राचीं होत्रां प्रतिरन्तावितं नरा गृणाना जमदग्निना ॥

8.101.09a आ नो यज्ञं दिविस्पृशं वायो याहि सुमन्मभिः ।

8.101.09c अन्तः पवित्र उपरि श्रीणानो३ऽयं शुक्रो अयामि ते ॥

8.101.10a वेत्यध्वर्युः पथिभी रजिष्ठैः प्रति हव्यानि वीतये ।

8.101.10c अधा नियुत्व उभयस्य नः पिब शुचिं सोमं गवाशिरम् ॥

8.101.11a बण्महाँ असि सूर्य बळादित्य महाँ असि ।

8.101.11c महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ॥

8.101.12a बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।

8.101.12c मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ॥

8.101.13a इयं या नीच्यर्किणी रूपा रोहिण्या कृता ।

8.101.13c चित्रेव प्रत्यदर्श्यायत्यन्तर्दशसु बाहुषु ॥

8.101.14a प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे ।

8.101.14c बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आ विवेश ॥

8.101.15a माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ।

8.101.15c प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥

8.101.16a वचोविदं वाचमुदीरयन्तीं विश्वाभिर्धीभिरुपतिष्ठमानाम् ।

8.101.16c देवीं देवेभ्यः पर्येयुषीं गामा मावृक्त मर्त्यो दभ्रचेताः ॥

8.102.01a त्वमग्ने बृहद्वयो दधासि देव दाशुषे ।

8.102.01c कविर्गृहपतिर्युवा ॥

8.102.02a स न ईळानया सह देवाँ अग्ने दुवस्युवा ।

8.102.02c चिकिद्विभानवा वह ॥

8.102.03a त्वया ह स्विद्युजा वयं चोदिष्ठेन यविष्ठ्य ।

8.102.03c अभि ष्मो वाजसातये ॥

8.102.04a और्वभृगुवच्छुचिमप्नवानवदा हुवे ।

8.102.04c अग्निं समुद्रवाससम् ॥

8.102.05a हुवे वातस्वनं कविं पर्जन्यक्रन्द्यं सहः ।

8.102.05c अग्निं समुद्रवाससम् ॥

8.102.06a आ सवं सवितुर्यथा भगस्येव भुजिं हुवे ।

8.102.06c अग्निं समुद्रवाससम् ॥

8.102.07a अग्निं वो वृधन्तमध्वराणां पुरूतमम् ।

8.102.07c अच्छा नप्त्रे सहस्वते ॥

8.102.08a अयं यथा न आभुवत्त्वष्टा रूपेव तक्ष्या ।

8.102.08c अस्य क्रत्वा यशस्वतः ॥

8.102.09a अयं विश्वा अभि श्रियोऽग्निर्देवेषु पत्यते ।

8.102.09c आ वाजैरुप नो गमत् ॥

8.102.10a विश्वेषामिह स्तुहि होतॄणां यशस्तमम् ।

8.102.10c अग्निं यज्ञेषु पूर्व्यम् ॥

8.102.11a शीरं पावकशोचिषं ज्येष्ठो यो दमेष्वा ।

8.102.11c दीदाय दीर्घश्रुत्तमः ॥

8.102.12a तमर्वन्तं न सानसिं गृणीहि विप्र शुष्मिणम् ।

8.102.12c मित्रं न यातयज्जनम् ॥

8.102.13a उप॑ त्वा जा॒मयो॒ गिरो॒ देदि॑शतीर्हवि॒ष्कृतः॑ ।

8.102.13c वा॒योरनी॑के अस्थिरन् ॥

8.102.14a यस्य॑ त्रि॒धात्ववृ॑तं ब॒र्हिस्त॒स्थावसं॑दिनम् ।

8.102.14c आप॑श्चि॒न्नि द॑धा प॒दम् ॥

8.102.15a प॒दं दे॒वस्य॑ मी॒ळ्हुषोऽना॑धृष्टाभिरू॒तिभिः॑ ।

8.102.15c भ॒द्रा सूर्य॑ इवोप॒दृक् ॥

8.102.16a अग्ने॑ घृ॒तस्य॑ धी॒तिभि॑स्तेपा॒नो दे॑व शो॒चिषा॑ ।

8.102.16c आ दे॒वान्व॑क्षि॒ यक्षि॑ च ॥

8.102.17a तं त्वा॑जनन्त मा॒तरः॑ क॒विं दे॒वासो॑ अङ्गिरः ।

8.102.17c ह॒व्य॒वाह॒मम॑र्त्यम् ॥

8.102.18a प्रचे॑तसं त्वा क॒वेऽग्ने॑ दू॒तं वरे॑ण्यम् ।

8.102.18c ह॒व्य॒वाहं॒ नि षे॑दिरे ॥

8.102.19a न॒हि मे॒ अस्त्यघ्न्या॒ न स्वधि॑ति॒र्वन॑न्वति ।

8.102.19c अथै॑ता॒दृग्भ॑रामि ते ॥

8.102.20a यद॑ग्ने॒ कानि॒ कानि॑ चि॒दा ते॒ दारू॑णि द॒ध्मसि॑ ।

8.102.20c ता जु॑षस्व यविष्ठ्य ॥

8.102.21a यदत्त्यु॑प॒जिह्वि॑का॒ यद्व॒म्रो अ॑ति॒सर्प॑ति ।

8.102.21c सर्वं॒ तद॑स्तु ते घृ॒तम् ॥

8.102.22a अग्निमिन्धानो मनसा धियं सचेत मर्त्यः ।

8.102.22c अग्निमीधे विवस्वभिः ॥

8.103.01a अदर्शि गातुवित्तमो यस्मिन्व्रतान्यादधुः ।

8.103.01c उपो षु जातमार्यस्य वर्धनमग्निं नक्षन्त नो गिरः ॥

8.103.02a प्र दैवोदासो अग्निर्देवाँ अच्छा न मज्मना ।

8.103.02c अनु मातरं पृथिवीं वि वावृते तस्थौ नाकस्य सानवि ॥

8.103.03a यस्माद्रेजन्त कृष्टयश्चर्कृत्यानि कृण्वतः ।

8.103.03c सहस्रसां मेधसाताविव त्मनाग्निं धीभिः सपर्यत ॥

8.103.04a प्र यं राये निनीषसि मर्तो यस्ते वसो दाशत् ।

8.103.04c स वीरं धत्ते अग्न उक्थशंसिनं त्मना सहस्रपोषिणम् ॥

8.103.05a स दृळ्हे चिदभि तृणत्ति वाजमर्वता स धत्ते अक्षिति श्रवः ।

8.103.05c त्वे देवत्रा सदा पुरूवसो विश्वा वामानि धीमहि ॥

8.103.06a यो विश्वा दयते वसु होता मन्द्रो जनानाम् ।

8.103.06c मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये ॥

8.103.07a अश्वं न गीर्भी रथ्यं सुदानवो मर्मृज्यन्ते देवयवः ।

8.103.07c उभे तोके तनये दस्म विश्पते पर्षि राधो मघोनाम् ॥

8.103.08a प्र मंहिष्ठाय गायत ऋताव्ने बृहते शुक्रशोचिषे ।

8.103.08c उपस्तुतासो अग्नये ॥

8.103.09a आ वंसते मघवा वीरवद्यशः समिद्धो द्युम्न्याहुतः ।

8.103.09c कुविन्नो अस्य सुमतिर्नवीयस्यच्छा वाजेभिरागमत् ॥

8.103.10a प्रेष्ठमु प्रियाणां स्तुह्यासावातिथिम् ।

8.103.10c अग्निं रथानां यमम् ॥

8.103.11a उदिता यो निदिता वेदिता वस्वा यज्ञियो ववर्तति ।

8.103.11c दुष्टरा यस्य प्रवणे नोर्मयो धिया वाजं सिषासतः ॥

8.103.12a मा नो हृणीतामतिथिर्वसुरग्निः पुरुप्रशस्त एषः ।

8.103.12c यः सुहोता स्वध्वरः ॥

8.103.13a मो ते रिषन्ये अच्छोक्तिभिर्वसोऽग्ने केभिश्चिदेवैः ।

8.103.13c कीरिश्चिद्धि त्वामीट्टे दूत्याय रातहव्यः स्वध्वरः ॥

8.103.14a आग्ने याहि मरुत्सखा रुद्रेभिः सोमपीतये ।

8.103.14c सोभर्या उप सुष्टुतिं मादयस्व स्वर्णरे ॥

Notes by Detlef Eichler (detlefeichler@googlemail.com):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This Devanāgarī version of Rigveda is from an ITRANS file which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The font used for the Rigveda text is Ancient Sanskrit 99. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (1.001.01a) the font Times New Roman is used.

4. Last updated: 26 March 2009